SANSKRIT

SELECTIONS & COMPOSITION

(with Grammar)

Compiler & Publisher

Chaturbhai P. Patel, B. A.

Price Re. 0–8–0

SANSKRIT

SELECTIONS & COMPOSITION

(with Grammar)

Compiler & Publisher

Chaturbhai P. Patel, B. A.

Author of Juni Gujarati Bhasha, Gurjar Bhasha Sahitya Pravesh, etc.

T. B. High Sckool, **Bhadran.**

Via: Anand.

Price Re. 0-8-0

FOREWORD

Since the University of Bombay prescribed a text book in sanskrit for matriculation examination, attention of students taking sanskrit as their second language began to be indiscriminately devoted to the text and particularly to the memorising its translation. In the absence of a cheap and suitable book of sanskrit selections, I felt great vexation in placing before my pupils necessary materil for general reading and exercise. It, therefore, needs no apology on my part to add one more publication on the subject

To add to its utility, I have attempted here to give suitable selections for students of std. VI besides general hints on sanskrit grammar & composition.

The section of कण्ठाभरण (select verses) as here arranged is a veritable necklace for youngsters if properly learnt, as the spirit underlying each of the pearls has a bearing on actual life.

The section of समासोक्ता कादम्बरी (Kadambari in a nut-shell) gives the entire story of Bana Bhatt in a short compass. I have still therein allowed myself to indulge in details on salient

points which I found to be morally healthy. In spite of its being so abridged, I am sure, the interest of the readers will be sustained throughout, and I hope its brevity will be all the same more relished.

The usefulness of selections from दशकुमारचरितं needs no testimonials. Lucidity and elegance of the language, for which its author दण्डी (दण्डिनः पदलालित्यं...) is so proverbial, recommends him to every student of sanskrit literature. In both these selections, I have tried to avoid abstruse words and clumsy constructions and have remained faithful to both the authors as far as compatible with my objective.

Selections from हितोपदेश and दशकुमारचरितं & the कण्ठाभरण are meant for Std.VI. Exercises for translation into sanskrit are based on the grammar portion to be done in Std.VI and general exercises are meant for matriculation candidates.

The composition section comprises of all essential matter that an everage student is expected to know. The grammar section is intended to supply bare needs of a university student and general questions on grammar at the end of the book are meant to refresh the students' knowledge of grammar in general. Under the

chapter on government in comp. section, I have intentionally refrained from giving principles underlying sanskrit illustrations, numerous in compass and varied in interest, which I trust students will commit to memory to their great advantage.

I take this opportunity of expressing my deep gratitude to Shriyut Mayashanker, the Acharya of Gurukula, Anand for readily undertaking proof-reading of sanskrit selections and to my pupil Mr. G. C. Vyas for preparing a press–copy of composition & grammar sections and also to the managers of the R. P. Aryaprakash press & the Charotar press for expediting the printing at the cost of their usual job-work.

I hope my labour will be amply rewarded if the book finds favour with those for whom it is compiled. Suggestions regarding the scope and plan of the book are cordially invited from brother–teachers.

Vaso
20–5–'39 } **C. P. Patel.**

कण्ठाभरणम्

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥१॥

योऽनात्मजे न च गुरौ न च भृत्यवर्गे
दीने दयां न कुरुते न च बन्धुवर्गे ।
किं तस्य जीवितफलेन मनुष्यलोके
काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥२॥

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥ ३ ॥

न सा सभा यत्र न सन्ति वृद्धा वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्मः स नो यत्र न सत्यमस्ति सत्यं न तद्यच्छलमभ्युपैति ॥४॥

पोतो दुस्तरवारिराशितरणे दीपोऽन्धकारागमे
निर्वाते व्यजनं मदान्धकरिणां दर्पोपशान्त्यै सृणिः ।
इत्थं तद्भुवि नास्ति यस्य विधिना नोपायचिन्ता कृता
मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः ॥५॥

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ ६ ॥

त्यजेत्क्षुधार्ता महिला स्वपुत्रं खादेत्क्षुधार्ता भुजगी स्वमण्डम् ।
बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति ॥७॥

माता मित्रं पिता चेति स्वभावात्त्रितयं हितम् ।
कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः ॥ ८ ॥

एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य ।
तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥ ९ ॥

वरं मौनं कार्यं न च वचनमुक्तं यदनृतं
वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम् ।

वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचि-
र्वरं भिक्षाशित्वं न च परधनास्वादनसुखम् ॥१०॥

यावतः कुरुते जन्तुः संबन्धान्मनसः प्रियान्।
तावन्तोऽपि निखन्यन्ते हृदये शोकशङ्कवः ॥ ११ ॥

अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि
राजन् ॥ १२ ॥

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्।
सौजन्यं यदि किं गुणैः स्वमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥१३॥

असंभवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय।
प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिनीभवन्ति ॥१४॥

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि
महात्मनाम् ॥ १५ ॥

वाञ्छा सज्जनसंगमे गुणिगणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम्।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलै-
रेते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥१६॥

लुब्धमर्थेन गृह्णीयात्स्तब्धमञ्जलिकर्मणा।
मूर्खं छन्दानुरोधेन याथातथ्येन पण्डितम् ॥ १७ ॥

स्नेहात्सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान्।
देव्यास्ततो विमनसः परिसान्त्वनाय

धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥ १८ ॥

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥१९॥

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतो
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥२०॥

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ॥ २१ ॥

कदा वाराणस्याममरतटिनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शंभो त्रिनयन
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥२२॥

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥२३॥

विधत्तां निःशङ्कं निरवधिसमाधिं विधिरहो
सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः ।
कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः
सवित्री कामानां यदि जगति जागर्ति भवती ॥२४॥

का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते ?
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥२५॥

सर्वत्र नो वार्त्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥२६॥

तानीन्द्रियाणि सकलानि तदेव नाम
सा बुद्धिरप्रतिहता वचनं तदेव ।

अर्थोष्मणा विरहितः पुरुषः स एव
अन्यः क्षणेन भवतीति विचित्रमेतत् ॥२७॥
कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः ॥२८॥
धृत्वा पदस्खलनभीतिवशात्करं मे
यारूढवत्यसि शिलाशकलं विवाहे ।
सा मां विहाय कथमद्य विलासिनि द्या-
मारोहसीति हृदयं शतधा प्रयाति ॥ २९ ॥
अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहो शिलोच्चये मूर्च्छति मारुतस्य ॥३०॥
धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी
सत्यं सूनुरयं दया च भगिनी भ्राता मनःसंयमः ।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजन-
मेते यस्य कुटुम्बिनो वद सखे कस्माद्भयं योगिनः ॥३१॥
प्रत्यर्थीभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने ।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ॥३२॥
एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानवराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥३३॥
अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥३४॥
रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति चक्रवालम् ।
इत्थं विचिन्तयति कोशगते द्विरेफे

हा हन्त हन्त नलिनीं गज उज्जहार ॥३५॥
क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥३६॥
व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥३७॥
साहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये।
भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ॥३८॥
रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥ ३९ ॥
रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम्।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः ॥४०॥
आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
"कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति" ॥४१॥
स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥४२॥
शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥४३॥

व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥४४॥

मन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥४५॥

कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन ॥४६॥

शेते या किल हंसतूलशयने निद्राति सा स्थण्डिले
वस्ते या मृदुलं दुकूलमबला गृह्णाति सा वल्कलम्।
या वा चन्दनपङ्कलेपशिशिरे धारागृहे वर्तते
पञ्चानामुदितोष्मणां हुतभुजां सा मध्यमासेवते ॥४७॥

न पृथग्जनवच्छुचो वशं वशिनामुत्तम गन्तुमर्हसि।
द्रुमसानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः ॥४८॥

"सौमित्रे! ननु सेव्यतां तरुतलं चण्डांशुरुज्जृम्भते"
"चण्डांशोर्निशि का कथा रघुपते! चन्द्रोऽयमुन्मीलति"।
"वत्सैतद्विदितं कथं नु भवता?" "धत्ते कुरङ्गं यतः"
"क्वासि प्रेयसि हा कुरङ्गनयने चन्द्रानने जानकि!" ॥४९॥

अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम्।
स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ॥५०॥

अकर्दममिदं तीर्थं भरद्वाज निशामय।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥५२॥

सन्तः सन्तु निरन्तरं सुकृतिनो विध्वस्तपापोदया
राजानः परिपालयन्तु वसुधां धर्मे स्थिताः सर्वदा।
काले संततवर्षिणो जलमुचः सन्तु स्थिराः पुण्यतो
मोदन्तां घनबद्धबान्धवसुहृद्गोष्ठिप्रमोदाः प्रजाः ॥५१॥

समासोक्ता कादम्बरी

१. शूद्रकसभां प्रति चाण्डालकन्यकागमनम्

आसीदशेषनरपतिशिरःसमभ्यर्चितशासनः पाकशासन इवापरः, चतुरुदधिमालामेखलाया भुवो भर्ता शूद्रको नाम राजा। स मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, वाचि सरस्वत्या, मुखे शशिना, प्रज्ञायां सुरगुरुणा, रूपे मनसिजेन, तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य। तस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकराः, शास्त्रेषु चिन्ता, स्वप्नेषु विप्रलम्भाः, छत्रेषु कनकदण्डाः, ध्वजेषु प्रकम्पाः, करिषु मदविकाराश्च प्रजानामासन्। तस्य च राज्ञः त्रिभुवनप्रसवभूमिरिव वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधान्यासीत्। प्रथमे वयसि वर्तमानस्यापि रूपवतोऽपि महत्यपि चावरोधे सति तस्य सुरतसुखस्योपरि द्वेष इवासीत्। तमेकदा सुखासीनं राज्याधिदेवतेव विग्रहिणी प्रतिहारी समुपसृत्य क्षितितल-निहितजानुकरकमला सविनयमब्रवीत्–'देव, द्वारस्थिता चाण्डालकन्यका काचित्पञ्जरस्थं शुकमादाय देवं विज्ञापयति –'सकलभुवनतलरत्नानामुदधिरिवैकभाजनं देवः। विहंगम-श्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपाद-मूलमादायागताहमिच्छामि देवदर्शनसुखमनुभवितुम्' इति। अथ राज्ञाऽऽदिष्टा प्रतीहारी तां मातङ्गकुमारीं प्रावेशयत्। प्रविश्य च सानन्तगजतुरगसाधनमपि खड्गमात्रसहायम्, आयतलोचनमपि सूक्ष्मदर्शनम्, कुपतिमपि कलत्रवल्लभम्, अत्यन्तशुद्धस्वभावमपि कृष्णचरितं राजानमद्राक्षीत्।

राजाऽपि मातङ्गजातिस्पर्शदोषपरिजिहीर्षुणा प्रजापतिना किमिदमनुचितं कृतमिति चिन्तयन्नतिशयरूपाकृतिं तामनिमिषलोचनो ददर्श। कृतप्रणामायां च तस्यां मणिकुट्टिमोपविष्टायां तया सहागतः पुरुषस्तं पञ्जरगतमेव शुकमादाय किञ्चिदुपसृत्य राज्ञे न्यवेदयत्। अब्रवीच्च–'देव विदितसकलशास्त्रार्थः, चित्रकर्मणि प्रवीणः, गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः, सकलभूतलरत्नभूतोऽयं वशम्पायनो नाम शुकः सर्वरत्नानामुदधिरिव देवो भाजनमिति कृत्वैनमादाय मत्स्वामिदुहिता देवपादमूलमायाता। तदयमात्मीयः क्रियताम्' इत्युक्त्वा नरपतेः पुरो निधाय पञ्जरमसावपससार। अपसृते च तस्मिन्स विहंगराजो राजाभिमुखो भूत्वोन्नमय्य दक्षिणं चरणमतिसंस्कारवत्या गिरा कृतजयशब्दो राजानमन्तरेण कञ्चिच्छ्लोकं पपाठ। अनेन सञ्जातविस्मयस्तु राजा समीपवर्तिनं कुमारपालितनामानममात्यमब्रवीत् 'श्रुता भवद्भिरस्य विहंगमस्य स्पष्टता वर्णोच्चारणे। स्वरे च मधुरता। प्रथमं तावदिदमेव महदाश्चर्यम्, यदयं मानवसुलभां गिरमुदीरयति। प्रायेण हि पक्षिणः पशवश्च भयाहारमैथुननिद्रासंज्ञामात्रवेदिनो भवन्ति। इदं तु महच्चित्रम्' इत्युक्तवति भूभुजि कुमारपालितः किंञ्चित्स्मितवदनोऽवादीत्–'किमत्र चित्रम्? एते हि शुकसारिकाप्रभृतयो विहंगविशेषा यथाश्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन' इति वदन्तं तं श्रुत्वा समासन्नस्नानसमयो विसर्जितराजलोकः क्षितिपतिरास्थानमण्डपादुत्तस्थौ। 'वैशम्पायनः प्रवेश्यतामभ्यन्तरम्' इति ताम्बूलकरण्डकवाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो व्यायामभूमिमयासीत् तत्र कृतपरिश्रमो महीपतिः स्नान-

कलशैरुपशोभितां स्नानभूमिमगात्। अथ निर्वर्तिताभिषेको विषधरनिर्मोकपरिलघुनी परिधाय धौतवाससी मन्त्रपूततोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत्। उपरचितपशुपतिपूजश्च निष्क्रम्य देवगृहात्कृतवस्त्रपरिवर्तो रत्नकर्णपूरमात्राभरणो भूपतिभिः सह भोजनं निर्वर्तयामास।

अथ मुहूर्तादिव वैशम्पायनः प्रतीहारीगृहीतपञ्जरः कनकवेत्रलतावलम्बिना किंचिदवनतपूर्वकायेन सितकञ्चुकावच्छन्नवपुषा जराधिवलितमौलिना कञ्चुकिनानुगम्यमानो राजान्तिकमाजगाम। क्षितितलनिहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत्–'देव, देव्यो विज्ञापयन्ति, देवादेशादेष वैशम्पायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्यानीतः' इत्यभिधाय गते च तस्मिन्राजा वैशम्पायनमपृच्छत्–'कच्चिदभिमतमास्वादितमभ्यन्तरे भवता किंचिदशनजातम्' इति। स प्रत्युवाच–'देव, किं वा नास्वादितम्। सर्वमेव देवीभिः स्वयं करतलोपनीयमानममृतायते' इति। एवंवादिनो वचनमाक्षिप्य नरपतिरब्रवीत्–'आस्तां तावत्सर्वम्। अपनयतु नः कुतूहलम्। आवेदयतु भवानादितः प्रभृति कात्स्र्न्येनात्मनो जन्म कस्मिन्देशे, भवान्कथं जातः, केन वा नाम कृतम्, का ते माता, कस्ते पिता, कथं वेदानामागमः, कथं शास्त्राणां परिचयः, कुतः कला आसादिताः, किंहेतुकं जन्मान्तरानुस्मरणम्, कथं पञ्जरबन्धनम्, कथं चाण्डालहस्तगमनम्, इह वा कथमागमनम्' इति। वैशम्पायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्टो मुहूर्तमिव ध्यात्वा सादरमब्रवीत्–'देव, महतीयं कथा। यदि कौतुकमाकर्ण्यताम्' इति।

२. शुकजन्मकथा

अस्ति मध्यदेशालंकारभूता मेखलेव भुवः, क्रूरसत्त्वापि मुनिजनसेविता, पुष्पवत्यपि पवित्रा विन्ध्याटवी नाम। तस्यां सकलभुवनविख्यातं गोदावर्या परिगतमाश्रमपदमासीत्। यत्रदशरथवचनमनुपालयन्नुत्सृष्टराज्यो दशवदनलक्ष्मीविभ्रम-विरामो रामो महामुनिमगस्त्यमनुचरन्सह सीतया लक्ष्मणोपरचितरुचिरपर्णशालः पञ्चवट्यां कंचित्कालं सुखमुवास। यत्र चाधुनापि जलधरसमये गम्भीरं निनादमाकर्ण्य भगवतो रामस्य त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरन्तो जनकात्मजासंवर्धिता जीर्णमृगा न गृह्णन्ति शष्पकवलमजस्रम्। एतादृशस्याश्रमपदस्य नातिदूरे वनदेवताभिः केशपाशकुसुमैः सुरभीकृतमपां निधानं पम्पाभिधानं पद्मसरः। तस्य च पश्चिमे तीरे परिगतो व्रततिभिः शाखाबाहुभिरुपगुह्येव विन्ध्याटवीं स्थितो महाजीर्णः शाल्मलीतरुः।

तत्र च शाखाग्रेषु कोटरोदरेषु पल्लवान्तरेषु स्कन्धसंधिषु जीर्णवल्कलविवरेषु महावकाशतया विस्रब्धविरचितकुलायसहस्राणि दुरारोहतया विगतभयानि नानादेशसमागतानि शुकशकुनिकुलानि प्रतिवसन्ति स्म। एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्तमानस्य कथमपि पितुरहमेको विधिवशात्सूनुरभवम्। अतिप्रबलया चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे परलोकमगमत्। अतिपरिणतवयाश्च मम तातः स्फुटिताग्रकोटिना चञ्चुपुटेन परनीडपतिताभ्यः शालिवल्लरीभ्यस्तण्डुलकणानादायादाय मह्यमदात्। एकदा तु प्रत्यूषसि स्वनीडावस्थित एव ताते मयि च मृगयाकोलाहलध्वनिरुद्-

चरत्। आकर्ण्य च तमहमश्रुतपूर्वमुपजातवेपथुरर्भकतया जर्जरितकर्णविवरो भयविह्वलः समीपवर्तिनः पितुः प्रतीकारबुद्ध्या जराशिथिलपक्षपुटान्तरमविशम्। अचिराच्च प्रशान्ते तस्मिन्मृगयाकलकले मन्दीभूतभयोऽहमुपजातकुतूहलः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरोधरां प्रसार्य शैशवात्किमिदमित्युपजातदिदृक्षस्तामेव दिशं चक्षुः प्राहिणवम्।

अभिमुखमापतच्चानेकसहस्रसंख्यं शबरसैन्यमद्राक्षम्। मध्ये च तस्य महतः शबरसैन्यस्य प्रथमे वयसि वर्तमानम्, एकलव्यमिव जन्मान्तरगतम्, आयतललाटमतितुङ्गघोरघोणं मातङ्गकनामानं शबरसेनापतिमपश्यम्। सोऽटवीभ्रमणसमुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलीवृक्षस्याधश्छायायां पल्लवासने समुपाविशत्। कृताहारपानश्च सकलसैन्यानुगम्यमानः शनैः शनैरभिमतं दिगन्तरमयासीत्। एकतमस्तु जरच्छबरस्तस्मात्पुलिन्दवृन्दादनासादितहरिणपिशितः पिशिताशन इव विकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुतले मुहूर्तमिव व्यलम्बत। अन्तरिते च शबरसेनापतौ स जरठशबरस्तमनेकतालतुङ्गमभ्रंकषशाखाशिखरमपि सोपानैरिवायत्नेनैव पादपमारुह्य फलानीव तस्य वनस्पतेः शाखान्तरेभ्यः शुकशावकानग्रहीत्। अपगतासूंश्च कृत्वा क्षितावपातयत्। तातस्तु तं महान्तमकाण्ड एवोपप्लवमुपनतमालोक्य पक्षसंपुटेनाच्छाद्य मां किंकर्तव्यतामूढः क्रोडविभागेन मामवष्टभ्य तस्थौ। असावपि पापः शाखान्तरैः संचरमाणः कोटरद्वारमागत्यातिनृशंसो मुहुर्मुहुर्दत्तचञ्चुप्रहारमुत्कूजन्तमाकृष्य तातं गतासुमकरोत्। उपरतं च

तमवनितले शिथिलशिरोधरमधोमुखममुञ्चत्। अहमपि तच्चरणान्तरे निवेशितशिरोधरो निभृतमङ्गनिलीनस्तेनैव सह महतः शुष्कपत्रराशेरुपर्यपतम्। अङ्गानि येन मे नाशीर्यन्त। यावच्चासौ तस्मात्तरुशिखरान्नावतरति तावदहमवशीर्णपत्रसवर्णत्वादस्फुटोपलक्ष्यमाणमूर्तिः पितरमुपरतमुत्सृज्य नृशंस इव प्राणपरित्यागक्षमेऽपि समये बालतया कालान्तरभुवः स्नेहरसस्यानभिज्ञो भयेनैव किंचिदुपजाताभ्यां पक्षाभ्यामीषत्कृतावष्टम्भो लुठन्नितस्ततः कृतान्तमुखकुहरादिव निर्गतमात्मानं मन्वानो नातिदूरवर्तिनस्तमालविटपिनो मूलमविशम्। अवतीर्य च स क्षितितलविप्रकीर्णान्संहृत्य शुकशिशूनेकलतापाशसंयतानाबध्य सेनापतिगतेनैव वर्त्मनागच्छत्। मां तु बलवती पिपासा परवशमकरोत्। अनया च कालकलया सुदूरमतिक्रान्तः स पापकृदिति परिकलय्य किंचिदुन्नमितकन्धरो भयचकितया दृशा दिशोऽवलोक्य तृणेऽपि चलति पुनः प्रतिनिवृत्त इति तमेव पापकारिणं पदे पदे उत्प्रेक्षमाणो निष्क्रम्य तस्मात्तरुमूलात्सलीलसमीपं सर्तुं यत्नमकरवम्।

अजातपक्षतया नातिस्थिरतरचरणसंचारस्य मुहुर्मुहुर्मुखेन पततः स्थूलं स्थूलं श्वसतो धूलिधूसरस्य समभून्मम मनसि।–'उपरतेऽपि सुगृहीतनाम्नि तातेऽहं पुनरेव प्राणिमि। धिङ्मामकरुणमतिनिष्ठुरमकृतज्ञम्। अतिकृपणाः खल्वमी प्राणा यदुपकारिणमपि तातं क्वापि गच्छन्तमद्यापि नानुगच्छन्ति। अद्यापि दूर एव सरस्तीरम्। दिवसस्येयं कष्टा दशा वर्तते। गन्तुमल्पमपि मे नालमङ्गकानि। सीदति मे हृदयम्' इति चिन्तयत्येव मयि समीपवर्तिनस्तपोवनस्या-

भिष्ठातुर्जाबालेर्नाम महातपसो मुनेर्हारीतनामा कुमारकः सनत्कुमार इव सर्वविद्यावदातचेतास्तदेव कमलसरः सिस्नासुरुपागमत्। प्रायेणाकारणमित्राण्यतिकरुणार्द्राणि सदा खलु भवन्ति सतां चेतांसि। यतः स मां तदवस्थमालोक्य समुपजातकरुणोऽन्यतममृषिकुमारकमब्रवीत्– 'अयमजातपक्षपुटः शुकशिशुस्तरुशिखरात्परिच्युतः। श्येनमुखपरिभ्रष्टेन वानेन भवितव्यम्। यावदयमसुभिर्न मुच्यते तावदेव गृहाणैनम्। अवतारय सलिलसमीपम्' इत्यभिधाय तेन मां सरस्तीरमनाययत्। कतिचित्सलिलबिन्दूंश्च मामपाययत्। स्वयं च कृतस्नानो मां गृहीत्वा तपोवनाभिमुखं शनैरगच्छत्। भूगतः स्वर्ग इव खलु तत्तपोवनं भाति। तस्य मध्यभागमण्डलमलंकुर्वाणस्य रक्ताशोकतरोरधश्छायायामुपविष्टं पशुपतिमिव भस्मपाण्डुरोमाश्लिष्टशरीरं भगवन्तं जाबालिमपश्यम्।

अवलोक्य चाहमचिन्तयम्–'अहो प्रभावस्तपसाम्। इयमस्य शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामिनीव चक्षुषः प्रतिहन्ति तेजांसि। पुण्यानि हि नामग्रहणान्यपि महामुनीनां, किं पुनर्दर्शनानि। पुण्यभाजः खल्वमी मुनयो यदमुं पुण्याः कथाः शृण्वन्तः समुपासते। प्रायो महाभूतानां दुरभिभवानि भवन्ति तेजांसि। सर्वतेजसामयं चाग्रणीः। द्विसूर्यमिवाभाति जगदनेनाधिष्ठितं महात्मना। एष प्रवाहः करुणारसस्य, संतरणसेतुः संसारसिन्धोः, निकषोपलः शास्त्ररत्नानाम्, दावानलो रागपल्लवस्य, अर्गलाबन्धो नरकद्वाराणाम्, आयतनं मङ्गलानाम्, दर्शकः सत्पथानाम्। अस्य भगवतः प्रसादादेवोपशान्तवैरमपगत-

मत्सरं तपोवनम्। अहो प्रभावो महात्मनाम्। अत्र हि शाश्वतिकमपहाय विरोधमुपशान्तात्मानस्तिर्यञ्चोऽपि तपोवनवसतिसुखमनुभवन्ति। तथा हि, एष विकचोत्पलवनरचनानुकारिणमुत्पतच्चारुचन्द्रकशतं हरिणलोचनद्युतिशबलमभिनवशाद्वलमिव विशति शिखिनः कलापमातपाहतो निःशङ्कमहिः। अयमुत्सृज्य मातरमजातकेसरैः केसरिशिशुभिः सहोपजातपरिचयः प्रक्षरत्क्षीरधारं पिबति कुरङ्गपोतः सिंहीस्तनम्। एष मृणालकलापाशङ्किभिः शशिकरधवलं सटाभारमामीलितलोचनो बहु मन्यते द्विरदकलभैराकृष्यमाणं मृगपतिः। किं बहुना, फलमूलभृतो वल्कलिनो निश्चेतनास्तरवोऽपि सनियमा इव लक्ष्यन्तेऽस्य भगवतः। किं पुनः सचेतनाः प्राणिनः' इति।

एवं चिन्तयन्तमेव मां छायायामेकदेशे स्थापयित्वा हारीतः पादावुपगृह्य कृताभिवादनः पितुरनतिसमीपवर्तिनि कुशासने समुपाविशत्। आलोक्य तु मां सर्व एव मुनयः 'कुतोऽयमासादितः शुकशिशुः' इति तमासीनमपृच्छन्। असौ तु तानब्रवीत् 'अयं मया स्नातुमितो गतेन जातद्रुमेनानीतः। तद्यावदयमप्ररूढपक्षतिरक्षमोऽन्तरिक्षमुत्पतितुं तावदत्रैव कस्मिंश्चिदाश्रमतरुकोटरे मुनिकुमारकैरस्माभिश्चोपनीतेन नीवारकणनिकरेण फलरसेन च संवर्ध्यमानो धारयतु जीवितम्। अनाथपरिपालनं हि धर्मोऽस्मद्विधानाम्। उद्भिन्नपक्षतिस्तु गगनतलसंचरणक्षमो यास्यति यत्रास्मै रोचिष्यते। इहैव वोपजातपरिचयः स्थास्यति' इत्येवमादिकमस्मत्संबद्धालापमाकर्ण्य किंचिदुपजातकुतूहलो भगवाञ्जाबालिर्मामतिप्रशान्तया दृष्ट्या दृष्ट्वा सुचिरमुपजातप्रत्य-

भिज्ञान इव पुनः पुनर्विलोक्य 'स्वस्यैवाविनयस्य फलमनेनानुभूयते' इत्यवोचत्। तपोधनपरिषदा तूपयाच्यमानः स महामुनिः प्रत्यवदत्-'अतिमहदिदमाश्चर्यमाख्यातव्यम्। अल्पशेषमहः। प्रत्यासीदति च स्नानसमयः। भवतामप्यतिक्रामति देवार्चनविधिवेला। तदुत्तिष्ठन्तु भवन्तः। सर्व एवाचरन्तु यथोचितं दिवसव्यापारम्। अथ कृतदिवसव्यापारेषु सर्वेषु मुनिजनेष्वर्धयाममात्रावखण्डितायाश्च विभावर्यां हारीतः कृताहारं मामादाय सर्वैस्तैर्महामुनिभिरुपसृत्य चन्द्रातपोद्भासिनि तपोवनैकदेशे वेत्रासनोपविष्टमनतिदूरवर्तिना जालपादनाम्ना शिष्येण दर्भपवित्रपाणिना मन्दमुपवीज्यमानं पितरमवोचत्-'हे तात, सकलेयमाश्चर्यश्रवणकुतूहला समुपस्थिता तापसपरिषदाबद्धमण्डला प्रतीक्षते व्यपनीतश्रमश्च कृतोऽयं पतत्रिशावकः। तदावेद्यतां यदनेन कृतम्। अपरस्मिञ्जन्मनि कोऽयमभूद्भविष्यति च' इति। एवमुक्तस्तु स महामुनिरग्रतः स्थितं मामवलोक्य तांश्च सर्वानेकाग्राञ्छ्रवणपरान्मुनीन्बुद्ध्वा शनैः शनैरब्रवीत्-'श्रूयतां यदि कौतूहलम्।

३. जाबालिना शुकस्य पूर्वजन्मोदन्तकथनम्

अस्ति सकलत्रिभुवनललामभूताऽऽत्मनिवासोचिता भगवता महाकालाभिधानेनापरेव पृथिवी समुत्पादिता विजितामरलोकद्युतिरवन्तीषूज्जयिनी नाम नगरी। तस्यां मतिमानधीतधर्मशास्त्रः, तृतीय इव तेजसा कान्त्या च सूर्यचन्द्रमसोः, परिहृतप्रजापीडो राजा तारापीडोऽभूत्। तस्य च राज्ञो निखिलशास्त्रकलावगाहगम्भीरबुद्धिः, कविरिव वृषपर्वणः, वसिष्ठ इव दशरथस्य, विश्वामित्र इव रामस्य,

धौम्य इवाजातशत्रोः, दमनक इव नलस्य, सर्वकार्येष्वाहितमतिरमात्यो शुकनासो नामासीत्। स राजा बाल एव दोर्वीर्येण विजित्य सप्तद्वीपवलयां वसुंधरां तस्मिञ्छुकनासनाम्नि मन्त्रिणि सुहृदीव राज्यभारमारोप्य सुस्थिताः प्रजाः कृत्वा कर्तव्यशेषमपरमपश्यत्। अनेकविधं यौवनसुखमनुभवन्स प्रजानुरागहेतोरन्तरान्तरा दर्शनं ददौ। सिंहासनं च निमित्तेष्वारुरोह। शुकनासोऽपि महान्तं राज्यभारमनायासेनैव प्रज्ञाबलेन बभार। भूयसा च कालेन सर्वेषामपि जीवलोकसुखानां प्रायोऽन्तं ययौ। एकं तु सुतमुखदर्शनसुखं न लेभे। यथा यथा च यौवनमतिचक्राम तथा तथा विफलमनोरथस्यास्यानपत्यताजन्मा संतापोऽवर्धत। तस्य सकलान्तःपुरप्रधानभूता महिषी विलासवती नाम। एकदा तारापीडः पुत्रमुखदर्शनाभावखिन्नमानसां स्वां जायां विलासवतीं सान्त्वयन् निजगाद–'देवि, किमत्र क्रियतां दैवायत्ते वस्तुनि। अलमतिमात्रं रुदितेन। न वयमनुग्राह्याः प्रायो देवतानाम्। आत्मजपरिष्वङ्गामृतास्वादसुखस्य नूनमभाजनमस्माकं हृदयम्। अन्यस्मिञ्जन्मनि न कृतमवदातं कर्म। जन्मान्तरकृतं हि कर्म फलमुपनयति पुरुषस्येहजन्मनि। न हि शक्यं दैवमन्यथा कर्तुमभियुक्तेनापि। यावन्मानुष्यके शक्यमुपपादयितुं तावत्सर्वमुपपाद्यताम्। अधिकां कुरु देवि, गुरुषु भक्तिम्। द्विगुणामुपपादय देवतासु पूजाम्। ऋषिजनसपर्यासु दर्शितादरा भव। परं हि दैवतमृषयो यत्नेनाराधिता यथासमीहितफलानां दुर्लभानामपि वराणां दातारो भवन्ति। श्रूयते हि पुरा चण्डकौशिकप्रभावान्मगधेषु बृहद्रथो नाम राजा जनार्दनस्य जेतारमतुलभुजबलमप्रतिरथं

जरासन्धं नाम तनयं लेभे। दशरथश्च राजा परिणतवया विभाण्डकमहामुनिसुतस्यर्ष्यशृङ्गस्य प्रसादान्नारायणभुजानिवाप्रतिहतानुदधीनिवाक्षोभ्यानवाप चतुरः पुत्रान्। अन्ये च राजर्षयस्तपोधनानाराध्य पुत्रदर्शनामृतस्वादसुखभाजो बभूवुः। अमोघफला हि महामुनिसेवा भवन्ति। यथा त्वां तथा मामपि दहत्येवायमहर्निशमनल इवानपत्यतासमुद्भवः शोकः। शून्यमिव प्रतिभाति मे जगत्। अफलमिव पश्यामि राज्यम्। अप्रतिविधेये तु विधातरि किं करोमि। तन्मुच्यतामयं देवि, शोकानुबन्धः। आधीयतां धैर्ये धर्मे च धीः। धर्मपरायणानां हि समीपसंचारिण्यः कल्याणसंपदो भवन्ति' इत्येवमभिधाय सलिलमादाय स्वयं करतलेनास्याः साश्रुलेखमाननं ममार्ज। एवं धर्मोपदेशगर्भाभिर्वाग्भिराश्वास्य सुचिरं स्थित्वा नरेन्द्रो निर्जगाम।

अथ संयमवन्तौ तौ दम्पती देवताप्रसादेन व्यतीतेष्वहःसु पुत्रदर्शनसुखमवापतुः। राजा स्वसूनोश्चन्द्रापीड इति नाम चकार। शुकनासस्यापि ज्येष्ठायां ब्राह्मण्यां मनोरमाभिधानायां वैशम्पायनो नाम तनयो जज्ञे। तौ स्वधर्मोचिताः सर्वाः विद्याः कलाश्च सहस्थितावेव गुरोरधिजगाते। एकदाधीताशेषविद्यं चन्द्रापीडं गृहमानेतुं राजा तारापीडो बलाधिकृतं बलाहकनामानं विद्यागृहं प्राहिणोत्। बलाहको विद्यामन्दिरं प्रवेशितश्चन्द्रापीडमुपसृत्य दर्शितविनयो व्यजिज्ञपत्–'कुमार, महाराजः समाज्ञापयति–'पूर्णा नो मनोरथाः। अधीतानि शास्त्राणि। शिक्षिताः सकलाः कलाः। अयमत्रभवतो दशमः संवत्सरो विद्यागृहमधिवसतः। तत्पारसीकाधिपतिप्रेषितमिन्द्रायुधनामानं तुरङ्गममारुह्याग-

म्यतां गृहं प्रतीति'। अथचन्द्रापीडस्तुरगं दृष्ट्वासंशयमनेनापि महात्मना केनापि शापभाजा भवितव्यमिति चिन्तयंस्तमारुह्य बन्दिजनेन स्तूयमानो नगराभिमुखं प्रतस्थे। राजद्वारमासाद्य चन्द्रापीडस्तुरङ्गमादवततार। अवतीर्य च करतलेन करे वैशम्पायनमवलम्ब्य पुरः सविनयं प्रस्थितेन बलाहकेनोपदिश्यमानमार्गस्त्रिभुवनमिव पुञ्जीभूतं सकलाश्चर्याणामाकरमिव राजकुलं प्रविवेश। प्रविश्य च हंसधवलशयनतले निषण्णं निजजनकं दूरावनतेन शिरसा प्रणम्य चन्द्रापीडः प्रागेव निहितमासनमग्रचरणेन समुत्सार्य स्थण्डिल एव निषसाद। अथ पित्रा विसर्जितः स्वमातरमपि प्रणम्येन्द्रायुधारूढो भूत्वा शुकनासगृहं प्रपेदे। प्रविश्य च सादरोपनीतमपहाय रत्नासनमवनावेव राजपुत्रः समुपाविशत्। उपविष्टे च राजपुत्रे क्षणमिव तूष्णीं स्थित्वा शुकनासो हर्षपुलकिततनुस्तमब्रवीत्—'तात, अद्य खलु देवस्य तारापीडस्य समाप्तविद्यमुपारूढयौवनमालोक्य भवन्तं सुचिराद्भुवनराज्यफलप्राप्तिरुपजाता। अद्य समृद्धाः सर्वा गुरुजनाशिषः। अद्य फलितमनेकजन्मान्तरोपात्तमवदातं कर्म। अद्य प्रसन्नाः कुलदेवताः। न ह्यपुण्यभाजां भवादृशास्त्रिभुवनविस्मयजनकाः पुत्रतां प्रतिपद्यन्ते। क्वेदं वयः। क्वेयममानुषी शक्तिः। क्व चेदमशेषविद्याग्रहणसामर्थ्यम्। अहो धन्याः प्रजा यासां भरतभगीरथप्रतिमो भवानुत्पन्नः पालयिता। किं खलु कृतमवदातं कर्म वसुंधरया ययासि भर्ता समासादितः। हरिवक्षःस्थलनिवासासद्ग्रहव्यसनितया हता खलु लक्ष्मीः, या विग्रहवती भवन्तं नोपसर्पति।' इत्यभिधाय च स्वयमाभरणवसनकुसुमाङ्गरागादिभिरभ्यर्च्य

विसर्जयाञ्चकार। विसर्जितश्चोत्थायान्तःपुरं प्रविश्य दृष्ट्वा च वैशम्पायनमातरं मनोरमां निर्गत्य समारुह्य चेन्द्रायुधं पित्रा पूर्वकल्पितं निजभवनं जगाम। अभ्यन्तरे च शयनीय-गृह एवेन्द्रायुधस्यावस्थानमकल्पयत्। अन्येद्युः कैलासनाम्ना कञ्चुकिना सह विलासवती कुलूतेश्वरदुहितरं पत्रलेखा-भिधानां 'बालेव लालनीया। स्वचित्तवृत्तिरिव चापलेभ्यो निवारणीया। शिष्येव द्रष्टव्या' इति संदिश्य परिचर्यार्थं चन्द्रापीडाय प्रेषितवती। पत्रलेखा तु ततःप्रभृति दर्शनेनैव समुपजातसेवारसा न दिवा न रात्रौ न सुप्तस्य नासीनस्य नोत्थितस्य न भ्रमतो न राजकुलगतस्य छायेव राजसूनोः पार्श्वं मुमोच। चन्द्रापीडस्यापि तस्यां दर्शनादारभ्य प्रति-क्षणमुपचीयमाना महती प्रीतिरासीत्। अभ्यधिकं च प्रतिदिवसमस्याः प्रसादमकरोत्। आत्मह्रदयादव्यतिरिक्ता-मिव चैनां सर्वविश्रम्भेषु मेने। एवं दिनेषु गच्छत्सु यौवराज्याभिषेकात्प्राक् शुकनासो दर्शनार्थमागतमारूढवि-नयमपि विनीततरमिच्छन् सविस्तरमुवाच—"तात चन्द्रा-पीड, विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्यु-पदेष्टव्यमस्ति। केवलं चाप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः गर्भे-श्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरंपरा सर्वा। अविनयानामेकैकमप्येषा-मायतनं किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रज-लप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झित-धवलतापि सरागैव भवति यूनां दृष्टिः। इन्द्रियहरिणहारिणी च सततदुरन्तेयमुपभोगमृगतृष्णिका। भवादृशा एव भवन्ति

भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः। अहंकारदाहज्वरमूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः, अलीकाभिमानोन्मादकारीणि धनानि, राज्यविषविकारतन्द्राप्रदा राजलक्ष्मीः। आलोकयतु तावत्कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्, इयं हि लक्ष्मीः क्षीरसागरात्पारिजातपल्लवेभ्यो रागम्, इन्दुसकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेर्नैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता। न ह्येवंविधमपरिचितमिह जगति किंचिदस्ति यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। दृढगुणासंदाननिस्पन्दीकृतापि नश्यति। उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविधृताप्यपक्रामति। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न धर्ममनुरुध्यते। नाचारं पालयति। गन्धर्वनगरलेखेव पश्यत एव नश्यति। जनं गुणवन्तमपवित्रमिव न स्पृशति। अभिजातमहिमिव लङ्घयति। दातारं दुःस्वप्नमिव न स्मरति। मनस्विनमुन्मत्तमिवोपहसति। एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानतां च गच्छन्ति। तथाहि। अभिषेकसमय एव चैतेषां मङ्गलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्यधूमेनेव मलिनीक्रियते हृदयम्। कामं भवान्प्रकृत्यैव धीरः, पित्रा च समारोपितसंस्कारः, तरलहृदयमप्रतिबुद्धं च मदयन्ति धनानि, तथापि भवद्गुण-

संतोषो मामेवं मुखरीकृतवान्। इदमेव च पुनः पुनरभिधीयसे। विद्वांसमपि सचेतनमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति। सर्वथावनमय द्विषतां शिरांसि। उन्नमय च बन्धुवर्गम्'। इत्येतावदभिधायोपशशाम। उपशान्तवचसि शुकनासे चन्द्रापीड उपदेशवाग्भिः प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव, अलंकृत इव, अभिषिक्त इव, प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम।

ततः कतिपयदिवसापगमे राजा स्वयमुत्क्षिप्तकलशः सह शुकनासेन मन्त्रपूतेन वारिणा सुतमभिषिषेच। अभिषेकादनन्तरमाधोरणोपनीतां करेणुमारुह्य पत्रलेखावैशम्पायनसमन्वितः ससैन्यो दिग्विजयार्थमिन्द्रायुधेन सनाथीकृतपूर्वभागः प्राचीमाशामभिप्रतस्थे। मार्गे विपुलबलसंदर्शनेनोपजातविस्मयः सर्वतोदत्तदृष्टिर्वैशम्पायनश्चन्द्रापीडमाबभाषे–'युवराज, किं न जितं देवेन महाराजाधिराजेन तारापीडेन यज्जेष्यसि, का दिशो न वशीकृता या वशीकरिष्यसि, कानि दुर्गाणि न प्रसाधितानि यानि प्रसाधयिष्यसि, के वा न प्रणता राजानः' इत्येवं वदत एव तस्य युवराजो रम्यां भूमिं प्राप्य तस्यां निवेशं कारितवान्। अतिवाहितदिवसश्च यामिनीमपि स्वशयनीयस्य नातिदूरे निहितशयननिषण्णेन वैशम्पायनेन, अन्यतश्च समीपे क्षितितले विन्यस्तकुथप्रसुप्तया पत्रलेखया सह, अन्तरा पितृसक्तम्, अन्तरा मातृसंबद्धम्, अन्तरा शुकनासमयं कुर्वन्नालापं नातिजातनिद्रः प्रायेण जाग्रदेव निन्ये। प्रत्यूषे चोत्थाय तेनैव क्रमेण प्रयाणं कारयामास। ततः क्रमेणावजितसकलभुवनतलः प्रदक्षिणीकृत्य वसुधां परिभ्रमन्

कदाचित्कैलाससमीपचारिणां हेमजकूटनाम्नां किरातानां सुवर्णपुरं नाम निवासस्थानं नातिविप्रकृष्टं पूर्वजलनिधेर्जित्वा जग्राह। तत्र च निखिलधरणीतलपर्यटनखिन्नस्य निजबलस्य विश्रामहेतोः कतिपयान्दिवसानतिष्ठत्।

एकदा तु तत्रस्थ एवेन्द्रायुधमारुह्य मृगयानिर्गतो विचरन् कानने शैलशिखरादवतीर्णं यदृच्छया किंनरमिथुनमद्राक्षीत्। अपूर्वदर्शनतया तु समुपजातकुतूहलः कृतग्रहणाभिलाषः सुदूरमनुससार। द्विगुणीकृतजवोऽपि किंनरमिथुनग्रहणेऽशक्तोऽभवत्। पिपासाकुलो राजपुत्रः सलिलमन्वेषमाणोऽतिमनोहरमाह्लादनं दृष्टेरच्छोदं नाम सरो दृष्टवान्। आलोकमात्रेणैवापगतश्रमो मनस्येवमकरोत्–'अहो निष्फलमपि मे किंनरमिथुनानुसरणमेतद्दृष्ट्वा सफलतामुपगतम्। आलोकितः खलु रमणीयानामन्तः। इदमुत्पाद्य सरःसलिलममृतरसमुत्पादयता वेधसा पुनरुक्ततामिव नीता स्वसृष्टिः। शिशिरतयैतत्स्पर्शसुखमुपहरति' कमलसुगन्धितया घ्राणमाप्याययति। हंसमुखरतया श्रुतिमानन्दयति। इति चिन्तयंस्तत्र कमलिनीपलाशैर्लतामण्डपपरिक्षिप्ते शिलातले संस्तरमास्तीर्य निधाय शिरसि पिण्डीकृतमुत्तरीयं निषसाद। मुहूर्तं विश्रान्तश्च तस्य सरस उत्तरे तीरप्रदेशे समुच्चरन्तमुन्मुक्तकवलेन निश्चलश्रवणपुटेन तन्मुखीभूतेनोद्ग्रीवेणेन्द्रायुधेन प्रथममाकर्णितं श्रुतिसुभगं वीणातन्त्रीझंकारमिश्रममानुषं गीतशब्दमशृणोत्। श्रुत्वा च कुतोऽत्र विगतमर्त्यसंपाते प्रदेशे गीतध्वनेः संभूतिरिति समुपजातकौतुकः संस्तरादुत्थाय तामेव दिशं चक्षुः प्राहिणोत्। अतिदवीयस्तया तु तत्प्रदेशस्य प्रयत्नव्यापृतलोचनो किंचिन्न

ददर्श तमेव केवलमनवरतं शब्दं शुश्राव। कुतूहलवशाच्च तमेव गीतध्वनिमभिप्रतस्थे। बहुना कालक्षेपेण स राजसूनुर्भगवतः शूलपाणेः शून्ये सिद्धायतने निर्ममां निरहंकारां निर्मत्सराममानुषाकृतिं दिव्यत्वादपरिज्ञायमानवयःपरिमाणामप्यष्टादशवर्षदेशीयामिवोपलक्ष्यमाणां प्रतिपन्नपाशुपतव्रतां दिव्यां कन्यकां ददर्श। ततोऽवतीर्य तरुशाखायां बद्ध्वा तुरङ्गममुपसृत्य भगवते भक्त्या प्रणम्य त्रिलोचनाय तामेव दिव्ययोषितमनिमिषपक्ष्मणा चक्षुषा पुनर्निरूपयामास। उदपादि चास्य मनसि–'अहो जगति जन्तूनामसमर्थितोपनतान्यापतन्ति वृत्तान्तान्तराणि। तथा हि, मया मृगयायां यदृच्छया निरर्थकमनुबध्नता तुरङ्गमुखमिथुनमयमतिमनोहरो मानवानामगम्यो दिव्यजनसंचरणोचितः प्रदेशो वीक्षितः। अत्र च सलिलमन्वेषमाणेन हृदयहारि सिद्धजनोपसृष्टजलं सरो दृष्टम्। तत्तीरलेखाविश्रान्तेन चामानुषं गीतमाकर्णितम्। तच्चानुसरता मानुषदुर्लभदर्शना दिव्यकन्यकेयमवलोकिता। न हि मे संशीतिरस्या दिव्यतां प्रति। आकृतिरेवानुमापयत्यमानुषताम्। तद्यदि मे सहसा दर्शनपथान्नापयाति, नारोहति वा कैलासशिखरम्, नोत्पतति वा गगनतलम्, ततः 'का त्वम्, किमभिधाना वा किमर्थं वा प्रथमे वयसि प्रतिपन्ना व्रतम्' इति सर्वं पृच्छामि'। इत्यवधार्य तस्यामेव स्फटिकमण्डपिकायामन्यतमं स्तम्भमाश्रित्य समुपविष्टो गीतसमाप्त्यवसरं प्रतीक्षमाणस्तस्थौ। अथ गीतावसाने मूकीभूतवीणा सा कन्यका प्रदक्षिणीकृत्य कृतहरप्रणामा तीर्थजलैरिव प्रक्षालयन्ती चन्द्रापीडमाबभाषे –'स्वागतमतिथये। कथमिमां भूमिमनुप्राप्तो महाभागः।

तदुत्तिष्ठ। आगम्यताम्। अनुभूयतामतिथिसत्कारः' इति। एवमुक्तस्तया संभाषणमात्रेणैवानुगृहीतमात्मानं मन्यमान उत्थाय भक्त्या कृतप्रणामः 'भगवति, यथाज्ञापयसि' इत्यभिधाय दर्शितविनयः शिष्य इव तां व्रजन्तीमनुवव्राज। व्रजंश्च समर्थयामास-'हन्त, तावन्नेयं मां दृष्ट्वा तिरोभूता। कृतं हि मे कुतूहलेन प्रश्नाशया हृदि पदम्। तथा संभाषयामि नियतमियमखिलमात्मोदन्तमभ्यर्थ्यमाना मया कथयिष्यति' इत्येवं च कृतमतिर्भिक्षाकपालेनाधिष्ठितां संनिहितभस्मालाबुकां गुहामद्राक्षीत्। चन्द्रापीडो महाश्वेतया महाश्वेता च चन्द्रापीडेनानुबध्यमानौ विन्यस्तशिलातलोपविष्टौ। क्षणमिव तूष्णीं स्थित्वा क्रमेण परिपृष्टो महाश्वेतया चन्द्रापीडो दिग्विजयादारभ्य किन्नरमिथुनानुसरणप्रसङ्गेनागमनमात्मनः सर्वमाचचक्षे। विदितसकलवृतान्ता भिक्षाकपालमादायाश्रमतरुभ्यः पतितानां फलानामुपयोगाय नियुक्तवती चन्द्रापीडम्। पश्चाच्च शिलातले विश्रब्धमुपविष्टां निभृतमुपसृत्य नातिदूरे समुपविश्य मुहूर्तमिव स्थित्वा चन्द्रापीडः सविनयमवादीत्-'भगवति, त्वत्प्रसादप्राप्तिप्रोत्साहितेन कुतूहलेनाकुलीक्रियमाणो मानुषतासुलभो लघिमा बलादनिच्छन्तमपि मां प्रश्नकर्मणि नियोजयति। तद्यदि नातिखेदकरमिव ततः कथनेनात्मानमनुग्राह्यमिच्छामि। किं कुलमनुगृहीतं भगवत्या जन्मना। किमर्थं वास्मिन्कुसुमसुकुमारे नवे वयसि व्रतग्रहणम्। अपनयतु नः कौतुकम्। आवेदयतु भवती सर्वमिदम्' इत्येवमभिहिता सा किमप्यन्तर्ध्यायन्ती तूष्णीं मुहूर्तमिव स्थित्वोष्णं निःश्वस्य स्थूलस्थूलैरश्रुभिरामीलितलोचना निःशब्दं

रोदितुमारेभे। तां च प्ररुदितां दृष्ट्वा चन्द्रापीडोऽचिन्तयत्—'अहो दुर्निवारता व्यसनोपनिपातानाम्। सर्वथा न न कश्चन स्पृशन्ति शरीरधर्माणमुपतापाः। बलवती हि द्वन्द्वानां प्रवृत्तिः' इति। संवर्धितकुतूहलो मुखप्रक्षालनोदकं प्रस्रवणादञ्जलिनोपनिन्ये। सापि तदनुरोधाद्वल्कलोपान्तेन वदनमपमृज्य दीर्घं च निःश्वस्य शनैः शनैः प्रत्यवादीत्।

४. महाश्वेतायाः स्ववृत्तान्तकथनम्।

'राजपुत्र, किं मम मन्दभाग्यायाः पापाया जन्मनः प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन। तथापि यदि महत् कुतूहलं तत् कथयामि। श्रूयताम्—'अप्सरसामेकत्र चतुर्दश कुलानि। तेषां द्वे गन्धर्वकुले। सोमपीयूषसंभूतानामप्सरसां कुले त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी गौरीतिनाम्ना कन्यका प्रसूता। तां च द्वितीयकुलाधिपतिर्हंसो नाम गन्धर्वराजः परिणिनाय। तयोश्च पित्रोरहमेवंविधा मन्दभाग्या समुत्पन्ना पुत्री। अवाप्ते च क्रमेऽहनि महाश्वेतेति यथार्थमेव नाम कृतम्। प्राप्तयौवनाहमेकदा मधुमासेऽम्बया गौर्या सहाच्छोदं सरः स्नातुमगाम्। तत्र चाहं सखीजनेन विचरन्ती तापसकुमारेणानुगतमतिमनोहरं स्नानार्थमागतमश्विनीकुमारमिव मुनिकुमारकमपश्यम्। तेन च कर्णावतंसीकृतां यौवनलीलामिव कुसुमलक्ष्म्या अमृतबिन्दुनिस्यन्दिनीमदृष्टपूर्वं कुसुममञ्जरीमद्राक्षम्। दृष्टमात्र एव तस्मिन् यूनि कालान्तरभुवा स्नेहरसेन वशीकृतं मे हृदयम्। प्राप्तप्रसरा चोपसृत्य तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम्—

'भगवन् किमभिधानः कस्य वायं तपोधनस्य युवा। किंनाम्नश्च तरोरियमवतंसीकृता कुसुममञ्जरी। अनाघ्रातपूर्वोऽयं गन्धः' इति। स तु मामीषद्विहस्याब्रवीत्—'बाले, किमनेन पृष्टेन प्रयोजनम्। अथ कौतुकमावेदयामि। श्रूयताम् अस्ति त्रिभुवनविख्यातकीर्तिः श्वेतकेतुर्नाम महामुनिः। स एकदा कमलवनेष्ववतरन् पुण्डरीकोपविष्टां लक्ष्मीं ददर्श। आलोकमात्रेण विवशीकृतोऽयं तां चकमे। तयोस्त्वयं पुण्डरीकनामा कुमारः। इयं चास्य कर्णे वनदेवतोपायनीकृता पारिजातमञ्जरी' इत्युक्तवति तस्मिन् स तपोधनयुवा स्वकर्णादपनीय मदीये कर्णपुटे तामकरोत्। स च मत्स्पर्शसुखेन तरलीकृताङ्गुलिरक्षमालां लज्जया सह गलितां नाज्ञासीत्। अथाहं तां गृहीत्वा स्नानार्थमुदचलम्। उच्चलितायां च मयि स द्वितीयो मुनिकुमारः पुण्डरीकस्य धैर्यस्खलितमालोक्य किंचित्प्रकटितप्रणयकोप इवावादीत्—'सखे पुण्डरीक, नैतदनुरूपं भवतः। क्षुद्रजनक्षुण्णः क एष मार्गः। धैर्यधना हि साधवः। किं यः कश्चन प्राकृत इव विक्लवीभवन्तमात्मानं न रुणत्सि। कुतस्तवापूर्वोऽयमाद्येन्द्रियोपप्लवो येनास्येवं कृतः। क ते तद्धैर्यम्। कासाविन्द्रियजयः। क तद्वशित्वम्। चेतसः क सा प्रशान्तिः। क तत्कुलक्रमागतं ब्रह्मचर्यम्। क ते गुरूपदेशाः। सर्वथा निष्फला प्रज्ञा। निर्गुणो धर्मशास्त्राभ्यासः। निरर्थकः संस्कारः। निष्प्रयोजना च प्रबुद्धता यदि भवादृशा अपि विकारहेतौ विक्रियन्ते' इत्येवमभिधीयमानश्च तेन किंचिदुपजातलज्ज इव प्रत्यवादीत्—सखे कपिञ्जल, किं मामन्यथा संभावयसि' इत्यभिधाय कोपाविष्टः स्फुरिताधरेण मुखेन्दुना

मामवदत्–'चञ्चले, प्रदेशादस्मादिमामक्षमालामदत्त्वा पदात्पदमपि न गन्तव्यम्' इति। तच्च श्रुत्वाहमात्मकण्ठादुन्मुच्यैकावलीम् 'भगवन्, गृह्यतामियमक्षमाला' इति मन्मुखासक्तदृष्टेः शून्यहृदयस्य प्रसारिते पाणौ निधाय स्वेदसलिलस्नातापि पुनः स्नातुमवातरम्। पश्चाच्च सखीजनेनाम्बया च सह तमेव चिन्तयन्ती स्वभवनमयासिषम्। गत्वा च प्रविश्य कन्यान्तःपुरं ततः प्रभृति तद्विरहविधुरा किमागतास्मि किं तत्रैव स्थितास्मि, किं जागर्मि, किं सुप्तास्मि, किं दिवस एषः, किं निशेयम्' इति ध्यायन्ती निष्पन्दमतिष्ठम्।

अथ ताम्बूलकरङ्कवाहिनी मदीया तरलिका नाम मयैव सहागता स्नातुमासीत्। सा च पश्चाच्चिरादिवागत्य तापसदारकस्य पृष्टमद्वृत्तान्तस्य स्वहस्तलिखितं पत्रं मह्यं व्यतरत्। एकदा तु निशासमये द्वितीयो मुनिदारकः कपिञ्जलः कञ्चुकिदत्तप्रवेशो मामागत्य सप्रश्रयमवादीत्– 'राजपुत्रि, किं ब्रवीमि? वागेव मे नाभिधेयविषयमवतरति त्रपया। क्व कन्दमूलाशी शान्तो वननिरतो मुनिजनः, क्वायं विषयोपभोगाभिलाषकलुषो रागप्रायः प्रपञ्चः। न जाने किमिदं वल्कलानां सदृशम्, उताहो जटानां समुचितम्, किं तपोऽनुरूपम्, आहोस्विद्धर्मोपदेशाङ्गमिदम्। अवश्यकथनीयमिदम्। नान्यच्छरणमालोक्यते। प्राणपरित्यागेनापि रक्षणीयाः सुहृदसव इति कथयामि। सुविदितमेव भवत्या यथा मया दर्शितकोपेनोपदिष्टः। स तु खिन्नमानसो न ज्ञातं कुत्र गत इति। अथैकदा लतागहने कृतावस्थानं प्रसुप्तमिव, शून्यान्तःकरणमपि हृदयनिवासि-

दयितम्, महाभूताधिष्ठितमिव, अनभिज्ञेयपूर्वाकारं तमहमद्राक्षम्। मयानुयुक्तश्च स सर्वां निजावस्थां मे निवेदयामास। मया त्वतिभूमिमयं गतः, न शक्यते निवर्तयितुमिति तस्मात्सरसो मृणालिकाः समुद्धृत्य तस्मिन्नेव लतागृहशिलातले शयनमस्याकल्पयम्। सर्वथा त्वदधीना एव तस्य प्राणा इति मत्वागतोऽस्मि, अतः परं भगवत्येव प्रमाणमित्यभिधाय कालातिपाताक्षमः स निर्गतः।

अथ व्याक्षिप्तहृदयाहमपि तरलिकाद्वितीया गन्तुं प्रवृत्ता। गच्छन्त्या च मया मार्गे निशीथप्रभावाद्दूरादेव विभाव्यमानस्वरमुन्मुक्तार्तनादम् 'हा हतोऽस्मि। हा दग्धोऽस्मि। हा वञ्चितोऽस्मि। हा किमिदमापतितम्। किं वृत्तम्। उत्सन्नोऽस्मि। दुरात्मन्, मदनपिशाच, पाप, निर्घृण, आः पापे दुष्कृतकारिणि, दुर्विनीते, महाश्वेते, किमनेन तेऽपकृतम्। हा भगवन्, श्वेतकेतो, पुत्रवत्सल, न वेत्सि मुषितमात्मानम्। हा धर्म, निष्परिग्रहोऽसि। हा तपः, निराश्रयमसि। हा सरस्वति, विधवासि। हा सत्य, अनाथमसि। हा सुरलोक, शून्योऽसि। प्रतिपालय माम्। अहमपि भवन्तमनुयास्यामि। न शक्नोमि भवन्तं विना क्षणमप्यवस्थातुमेकाकी। कथमपरिचित इवादृष्टपूर्व इवाद्य मामेकपद उत्सृज्य प्रयासि। केन वार्तां करोमि। कमालपामि। उत्तिष्ठ त्वम्। देहि मे प्रतिवचनं च' इत्येतानि चान्यानि च विलपन्तं कपिञ्जलमश्रौषम्। यदा चाहं समुपसृता तदा लोकान्तरं नीयमानं महाभागमद्राक्षम्। मयि चात्यन्तं विलपन्त्यां कश्चित्कुमुदधवलो महापुरुषलक्षणोपेतो दिव्याकृतिः पुरुषस्तमुपरतमुत्क्षिपन् गम्भीरस्वरेण 'वत्से महा-

श्वेते, न त्याज्यास्त्वया प्राणाः। पुनरपि तवानेन सह भविष्यति समागमः' इत्येवं पितेवाभिधाय सहैवानेन गगनतलमुदपतत्। अहं तु जातविस्मया किमिदमिति कपिञ्जलमपृच्छम्। असौ तु ससंभ्रममुदतिष्ठत् 'दुरात्मन्, क मे वयस्यमपहृत्य गच्छसि' इत्यभिधायोन्मुख उत्तरीय-वल्कलेन परिकरं बध्नंस्तमेवानुसरन्नन्तरिक्षमुदगात्।

पश्यन्त्या एव च मे सर्व एव ते तारागणमध्यमविशन्। मम तु तेन द्वितीयेनेव प्रियतममरणेन कपिञ्जलगमनेन द्विगुणीकृतशोकायाः सुतरामदीर्यत हृदयम्। अहं तु कपि-ञ्जलस्य प्रत्यागमनकाङ्क्ष्या तस्मिन्नेव सरस्तीरे तरलिका-द्वितीया क्षपां क्षपितवती।

प्रत्यूषसि तूत्थाय तस्मिन्नेव सरसि स्नात्त्वा कृतनिश्चया, तत्प्रीत्या तमेव कमण्डलुमादाय, तान्येव च वल्कलानि तामेवाक्षमालां गृहीत्वा, बुद्ध्वा निःसारतां संसारस्य, ज्ञात्त्वा च मन्दपुण्यतामात्मनः, अविगणय्य तातमम्बां च परित्यज्य सह परिजनेन सकलबन्धुवर्गम्, निवर्त्य विषय-सुखेभ्यो मनः संयमेन्द्रियाणि चानाथशरणमिमं शरणार्थिनी स्थाणुमाश्रिता। पितृभ्यामनेकविधमुपदिष्टापि गृहगमने मतिं नाबध्नाम्। प्रतिदिनं केवलमर्चयन्ती देवं त्र्यम्बकम-स्यामेव गुहायां तरलिकया सह दीर्घं शोकमनुभवन्त्यवसम्। साहमेवंविधा पापकारिणी निर्लज्जा निःस्नेहा निरवलम्बना च। किं मया दृष्ट्या पृष्ट्या वा कृतब्राह्मणवधमहापातकया करोति महाभागः' इत्यतिचिरमुच्चैः प्रारोदीत्। चन्द्रापीडस्तु प्रथममेव तस्या रूपेण दाक्षिण्येन च हृतहृदयः सुतरामा-क्षेपितप्रीतिरभवत्। यदनुमरणं कथ्यते तदुद्दिश्य तां बहु-

पदिदेश, पप्रच्छ चैनाम्–'भगवति, क नु सा वर्तते तव परिचारिकेदानीं यां भगवती कथाप्रसङ्गेन निर्दिष्टवती। सावदत्।

५. कादम्बरीवृत्तान्तम्।

'महाभाग, यत्तन्मया कथितममृतसंभवमप्सरसां कुलं तस्मान्मदिरेति नाम्ना मदिरायतेक्षणा कन्याभूत्। तस्याश्च देवश्चित्ररथः पाणिमग्रहीत्। तयोर्दुहितृरत्नमुदपादि कादम्बरीति नाम्ना। सा च मे जन्मनः प्रभृत्येकाशनशयनपानासना परं प्रेमस्थानमखिलविस्रम्भधाम द्वितीयमिव हृदयं बालमित्रम्। सा चामुनैव मदीयेन हतवृत्तान्तेन समुपजातशोका निश्चयमकार्षीत्–'नाहं कथंचिदपि सशोकायां महाश्वेतायामात्मनः पाणिं ग्राहयिष्यामि' इति। एवं कृतनिश्चयां तामवधार्य तस्याः पितरौ क्षीरोदनामानं कञ्चुकिनम्–'वत्से महाश्वेते, तव व्यतिकरेण दग्धहृदयानामिदमपरमस्माकमुपस्थितम्। इदानीं तु कादम्बरीमनुनेतुं त्वमेव शरणम्' इति संदिश्य मत्समीपमद्यैव प्रत्यूषसि प्रेषितवन्तौ। ततो मया गुरुवचनगौरवेण सखीप्रेम्णा च क्षीरोदेन सार्धं सा तरलिका कादम्बरीमनुनेतुं विसर्जिता। अथ क्षीणायां क्षपायामुषसि संध्यामुपास्य शिलातलोपविष्टायां महाश्वेतायां तरलिका षोडशवर्षवयसा केयूरकनाम्ना गन्धर्वदारकेणानुगम्यमाना प्रत्यूषस्येव प्रादुरासीत्।

आगत्य च कोऽयमित्युपजातकुतूहला चन्द्रापीडं सुचिरमवलोक्य महाश्वेतायाः समीपमुपसृत्य कृतप्रणामा सविनयमुपाविशत्। अनन्तरं चातिदूराननतेनोत्तमाङ्गेन

प्रणम्य केयूरकोऽपि समीपवर्ति शिलातलं भेजे। उपविष्टश्च तमदृष्टपूर्वमधःकृतकुसुमायुधमुपहसितसुरासुरगन्धर्वविद्याधररूपं रूपातिशयं चन्द्रापीडस्य दृष्ट्वा विस्मयमापेदे। परिसमाप्तजपा तु महाश्वेता पप्रच्छ तरलिकाम्–'किं त्वया दृष्टा प्रियसखी कादम्बरी कुशलिनी। करिष्यति वा तदस्मद्वचनम्' इति। अथ सा तरलिका विनयावनतमौलिर्मधुरया गिरा व्यजिज्ञपत्–'भर्तृदारिके, दृष्टा खलु मया भर्तृदारिका कादम्बरी सर्वतः कुशलिनी। अतः परं यत्किञ्चिद्वक्तव्यं तत्सर्वं तस्या एव वीणावादकः केयूरकः कथयिष्यति' इत्युक्त्वा विरराम। विरतवचसि च तस्यां केयूरकोऽब्रवीत्–'भर्तृदारिके' महाश्वेते, देवी कादम्बरी दृढदत्तकण्ठग्रहा त्वां विज्ञापयति–'यदियमागत्य मामवदत्तरलिका तत्कथय किमयं गुरुजनानुरोधः, किमिदं मच्चित्तपरीक्षणम्, किं गृहनिवासापराधनिपुणोपालम्भः, किं प्रेमविच्छेदाभिलापः, किं भक्तजनपरित्यागोपायः, किं वा प्रकोपः, जानास्येव मे सहजप्रेमनिस्यन्दनिर्भरं हृदयम्, एवमतिनिष्ठुरं संदिशन्ती कथमसि न लज्जिता। सुहृज्जनदुःखखेदिते हि मे मनसि कैव सुखाशा, कैव निर्वृतिः, कीदृशाः संभोगाः। यावद्भर्तृविरहविधुरा मे प्रियसखी महत्कृच्छ्रमनुभवति तावत्कीदृशं मया पाणिग्रहणम्' इत्यभिधाय तूष्णीमभूत्। महाश्वेता तु तच्छ्रुत्वा सुचिरं 'गच्छ स्वयमेवाहमागत्य यथार्हमाचरिष्यामि' इत्युक्त्वा केयूरकं प्राहिणोत्। महाश्वेताभ्यर्थितश्चन्द्रापीडोऽपि तयैव सह हेमकूटं गन्तुं प्रतस्थे। आसाद्य च हेमकूटं दूरादेव कृतप्रणामेन कनकवेत्रलताहस्तेन प्रतिहारजनेनोपदिश्यमा-

नमार्गे आश्चर्यमयमिव कुमारः कुमारीपुराभ्यन्तरं ददर्श। सखीजनेन सह कादम्बर्या अनेकविधान् संलापाञ्शृण्वन्नेव कादम्बरीभवनमुपययौ। मुहुर्मुहुश्चन्द्रापीडसंबद्धमेवालापं तद्रूपवर्णनामुखरं केयूरकं पृच्छन्तीं कादम्बरीं ददर्श। आसीच्चास्य मनसि-'शेषेन्द्रियाण्यपि मे वेधसा किमिति लोचनमयान्येव न कृतानि। किं वानेन कृतमवदातं कर्म चक्षुषा यदनिवारितमेनां पश्यति। अहो चित्रमेतदुत्पादितं वेधसा सर्वरमणीयानामेकं धाम। इत्येवं चिन्तयत एवास्य तस्या नयनयुगले निपपात चक्षुः। तदा तस्या अपि नूनमयं स केयूरकेणावेदित इति चिन्तयन्त्या रूपातिशय-विलोकनविस्मयस्मेरं निश्चलनिबद्धलक्ष्यं चक्षुस्तस्मिन् सुचिरं पपात। कादम्बरी तु कृच्छ्रादिव दत्तकतिपयपदा महाश्वेतां स्नेहनिर्भरं चिरदर्शनजातोत्कण्ठं सोत्कण्ठं कण्ठे जग्राह। महाश्वेतापि दृढतरदत्तकण्ठग्रहा तामवादीत्-'सखि' काद-म्बरि, भारते वर्षे तारापीडो नाम राजा। तस्यायमात्मज-श्चन्द्रापीडो दिग्विजयार्थमिहागतः। एष च दर्शनात्प्रभृति प्रकृत्या मे निष्कारणबन्धुतां गतः। कथिता चास्य बहुवारं मया प्रियसखी। तदपूर्वदर्शनोऽयमिति विमुच्य लज्जाम्, अविज्ञातशील इत्यपहाय शङ्कां यथा मयि तथात्रापि वर्तितव्यम्। एष ते मित्रं च बान्धवश्च परिजनश्च' इत्या-वेदिते तया चन्द्रापीडः प्रणाममकरोत्। यथोचितासनोप-विष्टेषु सर्वेषु कादम्बरी स्वयमुत्थाय सलिलेन महाश्वेता-याश्चरणौ प्रक्षाल्योत्तरीयांशुकेनापमृज्य पुनः पर्यङ्कमारुरोह। चन्द्रापीडस्यापि कादम्बर्या जीवितनिर्विशेषा सखी मदलेखेति नाम्ना बलादनिच्छतोऽपि प्रक्षालितवती चरणौ।

मुहूर्तापगमे महाश्वेतया वारंवारं निर्बध्यमाना कादम्बरी स्वहस्तेन चन्द्रापीडाय ताम्बूलं हृदयेन सहाददात्। अथ सहसैव कुमारः परिहासकालिन्द्योः शुकसारिकयोः पञ्जरस्थयोः कलहं शुश्राव। अत्रान्तरे चागत्य कञ्चुकी महाश्वेतामवादीत्–'आयुष्मति, देवश्चित्ररथो देवी च मदिरा त्वां द्रष्टुमाह्वयतः' इति। एवमभिहिता च गन्तुकामा 'सखि, चन्द्रापीडः क्वास्ताम्' इति कादम्बरीमपृच्छत्। अनेन खल्वनेकस्त्रीहृदयेषु वासः कृत इति मनसा विहस्य प्रकाशमवदत्–'सखि महाश्वेते, किं त्वमेवमभिदधासि। अस्य दर्शनादारभ्य नाहमीश आत्मनः किमुत भवनस्य परिजनस्य वा। यतो यत्रास्मै रोचते तत्रैव स्थीयतामनेन' इति। अथ महाश्वेता गन्धर्वराजं द्रष्टुं ययौ। चन्द्रापीडोऽपि विनोदार्थं प्रमदवने क्रीडापर्वतकमणिमन्दिरमगात्। कादम्बरी तु मन्मथाभिभूयमाना प्रासादमारुह्य तमेव राजपुत्रं चिन्तयन्ती स्वल्पामपि निर्वृतिं न लेभे। विनोदार्थं गतश्चन्द्रापीडोऽपि केयूरकेणोत्सङ्गे गृहीतचरणयुगलो दोलायमानेन चेतसा चिन्तां विवेश। अथ चन्द्रापीडः क्रीडापर्वतशिखरमारुरोह। प्रासादशिखरगता कादम्बर्यपि मनोजाक्षिप्तचित्ता सौधस्योपरितनं शिखरमारुरोह। तत्र च तं विलोकयन्ती दूरादेव तेन च विलोक्यमाना महान्तमपि कालमतिक्रान्तं नाज्ञासीत्। आरुह्य च प्रतीहार्या निवेदितमहाश्वेताप्रत्यागमना कादम्बरी तस्मादवततार। स्नानादिषु मन्दादरापि महाश्वेतानुरोधेन दिवसव्यापारमकरोत्। चन्द्रापीडोऽपि तस्मिन्नेव क्रीडापर्वतके सर्वमाहारादिकमहःकर्म चक्रे। तदा मदलेखा प्रभावर्षिणमतितारं शरच्छशिनमिव घनमुक्तांशुनि-

वहुधवलितदिङ्मुखं हारमादाय चन्द्रापीडमुवाच–'कुमार, तवेयमपहस्तिताहंकारकान्ता पेशलता प्रीतिपरवशं जनं कमिव न कारयति। प्रश्रय एव ते ददात्यवकाशमेवंविधानाम्। अनया चाकृत्या कस्यासि न जीवितस्वामी। अनेन चाकारणाविष्कृतवात्सल्येन चरितेन कस्य न वयस्यतामुत्पादयति। कस्य वा न समाश्वासयन्त्यमी स्वभावसुकुमारवृत्तयो भवद्गुणाः। त्वन्मूर्तिरेवात्रोपालम्भमर्हति, या प्रथमदर्शन एव विश्रम्भमुपजनयति। इतरथा हि त्वद्विधे सकलभुवनप्रथितमहिम्नि प्रयुज्यमानं सर्वमेवानुचितमिवाभाति। प्रणयितां चानेन व्यपदेशेन दर्शयति कादम्बरी, न विभवम्। तदयं शेषनामा हारः कादम्बर्या प्रेषितः महाश्वेतयापि कुमारस्य संदिष्टमेव। न खलु महाभागेन मनसापि कार्यः कादम्बर्याः प्रथमप्रणयप्रसरभङ्गः' इत्युक्त्वा तं तस्य वक्षःस्थले बबन्ध। प्रियसंलापांश्च कृत्वा चन्द्रापीडस्तां विसर्जयामास।

तत्रस्थस्य चास्यागत्याकथयत्केयूरकः 'देवी कादम्बरी देवं द्रष्टुमागता' इति। अथ चन्द्रापीडःससंभ्रममुत्थायागच्छन्तीं मदलेखया दत्तहस्तावलम्बां कादम्बरीमपश्यत्। आगत्य च सा प्रीतिपेशलतां दर्शयन्ती प्राकृतेव परिजनोचिते भूतले समुपाविशत्। चन्द्रापीडोऽपि 'कुमार, अध्यास्यतां शिलातलमेव' इत्यसकृदनुबध्यमानोऽपि मदलेखया भूमिमेवाभजत। सर्वासु चासीनासु तासु मुहूर्तमिव स्थित्वा वक्तुमुपचक्रमे चन्द्रापीडः–'देवि, दृष्टिमात्रप्रीते दासजने संभाषणादिकस्यापि प्रसादस्य नास्त्यवकाशः, किमुतैतावतोऽनुग्रहस्य। न खलु चिन्तयन्नपि निपुणं तमात्मनो गुण-

लवमवलोकयामि, यस्यायमनुरूपोऽनुग्रहातिरेकः। अति सरला तवेयमपगताभिमानमधुरा च सुजनता यदभिनवसेवकजनेऽप्येवमनुरुध्यते। प्रायेण मामुपचारहार्यमदक्षिणं देवी मन्यते। धन्यः खलु परिजनो यस्योपरि ते नियन्त्रणा स्यात्। आज्ञासंविभागकरणोचिते भृत्यजने क इवादरः। परोपकारोपकरणं शरीरम्, तृणलवलघु च जीवितम्' इति। अथैवंवादिनोऽस्य वचनमाक्षिप्य मदलेखा सस्मितमवदत्—'कुमार, भवतु। अतियन्त्रणया खिद्यते खलु सखी कादम्बरी। किमर्थं चैवमुच्यते। सर्वमिदमन्तरेणापि वचनमनया परिगृहीतम्, किं पुनरमुनोपचारफल्गुना वचसा संदेहदोलामारोप्यते' इति। कृतान्यप्रस्तावा सा पुनरुवाच—'कथं राजा तारापीडः, कथं देवी विलासवती, कथमार्यः शुकनासः, कीदृशी चोज्जयिनी, कियत्यध्वनि सा च' इत्यशेषं पप्रच्छ। अथ कादम्बरी शयनसौधशिखरमारुरोह। चन्द्रापीडोऽपि तेषां तांस्तान् गुणांश्चिन्तयन् क्षणदां क्षपितवान्। प्रभातप्रायायां रजन्यां चन्द्रापीडः प्रक्षालितमुखकमलो गृहीतताम्बूलः 'केयूरक, विलोकय देवी कादम्बरी प्रबुद्धा न वा, क्व वा तिष्ठति' इत्यवोचत्। गतप्रतिनिवृत्तेन च तेन 'देव मन्दरप्रासादस्याधस्तादंगणसौधवेदिकायां महाश्वेतया सहावतिष्ठते' इत्यावेदिते गन्धर्वराजतनयामाप्रष्टुमाजगाम।

अथ कादम्बरी 'सखि महाश्वेते, स्वाधीनोऽयं सपरिजनो जनः कुमारस्य स्व इवान्तरात्मा। क इवात्रानुरोधः' इत्यभिधाय गन्धर्वकुमारानाहूय 'प्रापयत कुमारं स्वां भूमिम्' इत्यादिदेश। चन्द्रापीडोऽप्युत्थाय प्रणम्य प्रथमं महाश्वेतां ततः कादम्बरीं तस्याश्च प्रेमस्निग्धेन चक्षुषा मनसा च

गृह्यमाणः 'देवि, किं ब्रवीमि। बहुभाषिणि न श्रद्दधाति लोकः। स्मर्तव्योऽस्मि परिजनकथासु' इत्यभिधाय कन्यान्तःपुरान्निर्जगाम। कादम्बरीवर्गोऽशेषः कन्यकाजनो गुणगौरवाकृष्टः परवश इव तं व्रजन्तमा बहिस्तोरणादनुवव्राज। निवृत्ते च कन्यकाजने केयूरकेणोपनीतं वाजिनमारुह्य हेमकूटात्प्रवृत्तो गन्तुम्। क्रमेण च प्राप्य महाश्वेताश्रममच्छोदसरस्तीरे स्कन्धावारमागतमपश्यत्। अथ स्कंधावारवर्तिना जनेन प्रणम्यमानः स्वभवनं विवेश। वैशम्पायनेन पत्रलेखया च सह विविधया कथया प्रायो दिवसमनैषीत्। अपरेद्युश्च समुत्थिते रवौ सहसैव प्रतीहारेण सह संप्रविशन्तं केयूरकं ददर्श। कादम्बरीमुद्दिश्य पृष्टः सः 'अद्य कुशलिनी, यामेवं देवः पृच्छति' इत्यभिधाय कादम्बरीप्रहितान्यभिज्ञानान्यदर्शयत्। महाश्वेतासंदेशेन च विज्ञातं तेन यद्बलवदस्वस्थशरीरा कादम्बरी तस्य पुनरागमनमपेक्षते इति। शयनीये विस्मृतं केयूरकेण सह प्रेषितं शेषं हारमपि स्वीकृत्य स्वकण्ठेऽकरोत्। तुरगदर्शनमिषेण केयूरकेण सह स मन्दुराभिमुखः प्रतस्थे। तत्र स रहसि केयूरकनिवेदिताशेषकादम्बरीवृत्तान्तः कथं कथं क्षणदामप्यक्षणदामिव निनाय।

प्रातः कुमार इन्द्रायुधमारुह्य पश्चादारोप्य पत्रलेखां स्कन्धावारे संस्थाप्य वैशम्पायनमशेषपरिजनं निवर्त्य च स केयूरकेणानुगम्यमानो हेमकूटं ययौ। तुरगादवतीर्य कादम्बरीप्रथमदर्शनकुतूहलिन्या पत्रलेखयानुगम्यमानः प्रविश्य 'क्व देवी कादम्बरी तिष्ठति' इति संमुखागतमन्यतमं वर्षधरमप्राक्षीत्। कृतप्रणामेन च तेन देव,

मत्तमयूरस्य क्रीडापर्वतकस्याधस्तात् कमलवनदीर्घिका तीरे विरचितं हिमगृहमध्यास्ते । इत्यावेदिते केयूरकेणोप दिश्यमानवर्त्मा हिमगृहमपश्यत् ।

चन्द्रापीडस्तु समुपसृत्य पूर्ववदेव तां महाश्वेताप्रणामपुरःसरं दर्शितविनयः प्रणनाम । कृतप्रतिप्रणामायां च कादम्बर्यां क्षितावेवोपाविशत् । अथ केयूरकः देवि, देवस्य चन्द्रापीडस्य प्रसादभूमिरेषा पत्रलेखा नाम ताम्बूलकरङ्कवाहिनी' इत्यभिधाय पत्रलेखामदर्शयत् । अथ कादम्बरी दृष्ट्वा ताम् 'अहो, मानुषीषु पक्षपातः प्रजापतेः' इति चिन्तयांबभूव । कृतप्रणामां च तां सादरम् 'एह्येहि' इत्यभिधायात्मनः समीपं सुकुतूहलपरिजन दृश्यमानां पृष्ठतः समुपावेशयत् । दर्शनादेवोपरूढ प्रीत्यतिशया च मुहुर्मुहुरेनां करकिसलयेन पस्पर्श । चन्द्रापीडस्तु निपुणालापेनाब्रवीत् 'देवि, जानामि कामरतिं निमित्तीकृत्य प्रवृत्तो ऽयमविचलसंतापतन्त्रो व्याधिः । सुतनु, सत्यं न तथा त्वामेष व्यथयति यथास्मान् । इच्छामि देहदानेनापि स्वस्थामत्रभवतीं कर्तुम् इति । ततो मदलेखा प्रत्यवादीत् 'कुमार, किं कथयामि । दारुणो ऽयमकथनीयः खलु संतापः । अपि च कुमारभावोपेतायाः किमिवास्याः यन्न संतापाय इति । आपृच्छ्य च ताः सर्वांश्चन्द्रपीडः स्कन्धावारगमनाय कादम्बरीभवनान्निर्ययौ । निर्गतं च तुरङ्गममारुरुक्षन्तं पश्चादागत्य केयूरको ऽभिहितवान् 'देव, मदलेखा विज्ञापयति देवी कादम्बरी खलु प्रथमदर्शनजनितप्रीतिः पत्रलेखा निवर्त्यमानामिच्छति पश्चाद् यास्यति । इति श्रुत्वा देवः प्रमाणम् इत्याकर्ण्य

चन्द्रापीडः केयूरक, धन्या स्पृहणीया च पत्रलेखा यामेवमनुबध्नाति दुर्लभो देवीप्रसादः । प्रवेश्यताम् । इत्यभिधाय पुनः स्कन्धावारमेवाजगाम । प्रविशन्नेव पितुः समीपादागतमभिज्ञाततरमालेखहारमद्राक्षीत् । धृततुरङ्गमश्च प्रीतिविस्फारितेन चक्षुषा दूरादेवापृच्छत् । अङ्ग, कश्चित्कुशलो तातः सह सर्वेण परिजनाम्बा च सर्वान्तःपुरैः इति । अथासावुपसृत्य प्रणामपुरःसरं पत्रद्वयं तस्य हस्ते ऽर्पयामास । 'लेखवाचनविरतिरेव प्रयाणकालतां नेतव्या' इति पितुः पत्रलिखितादेशात्तथैव तुरगाधिरूढः प्रयाणपटहमदापयत् । समीपे स्थितं बलाहकपुत्रं मेघनादनामानमादिदेश- 'भवता पत्रलेखया सहागन्तव्यम् । नियतं केयूरकस्तामादायैतावतीं भूमिमागमिष्यतीति तन्मुखेन विज्ञाप्य प्रणम्य देवी कादम्बरी महाश्वेतायाश्च सप्रदक्षिणं शिरसा पादौ वन्दनीयौ' इति । एवमादिश्य तम् 'सुहृदादिसाधनमक्लेशयता शनैः शनैर्गन्तव्यम्' इत्युक्त्वा वैशम्पायनं स्कन्धावारभरे न्ययुङ्क्त ।

६. चन्द्रापीडस्योज्जयिनीं प्रत्यागमनम् ।

स्वयं च तथारूढो दीर्घप्रयाणेन मार्गे ऽनन्यमनसा हेमकूटस्य स्मरन् कादम्बरीदर्शनं च पुनः पुनरभिलषन्नल्पैरेवाहोभिरुज्जयिनीमाजगाम । पौराणामर्धकमलानीव नमस्काराञ्जलिसहस्राणि प्रतीच्छन्नतर्कित एव विवेश नगरीम् । सर्वं गुरुजनं प्रणम्य निवेदितवैशम्पायनकुशलो विलासवतीभवन एव सर्वाः स्नानादिकाः क्रिया निर्वर्त्यापराह्णे निजभवनमयासीत् ।

ततः कतिपयदिवसापगमे मेघनादः पत्रलेखामादायागच्छत्। उत्ताम्यता च मनसा स पत्रलेखामुखेन सर्वं कादम्बरीवृत्तान्तं शुश्राव। सा च कुमारं तत्र नेतुं प्रेषितेत्यपि श्रुतवान्। 'देवेनाप्येतदवस्थां देवीं दूरीकुर्वता किमिदमापन्नवत्सलायाः स्वप्रकृतेरनुरूपं कृतम्' इत्युपालम्भगर्भं विज्ञप्तः पत्रलेखया चन्द्रापीडो निसर्गधीरप्रकृतिरपि नितरां पर्याऽकुलोभवत्। तत एकदा दूरादेवातिबहूनिव तुरंगमानद्राक्षीत्। स तु कादम्बरीविसृष्टः केयूरक एवासीत्। श्रुतं च तेन तस्माद्यावच्छक्यम्। पुनश्च केयूरको व्यज्ञपयत्–'देव, धैर्यमवलम्ब्य गमनाय यत्नः क्रियताम्। तस्या हि समागमाशयैवावष्टब्धं हृदयम्'। एवं वदन्तं तमादिदेश विश्रान्तये केयूरकम्। स्वयं तु 'स्कन्धावारोऽपि मेऽद्यापि न परापतति। तातोऽम्बा च मां न विसर्जयति। ममस्नेहदुःखिता गन्धर्वराजपुत्री कादम्बरी मामुद्दिश्य मकरकेतुनायास्यमाना दुःखं तिष्ठतीति। किं वा न मे बलवांस्तस्यामनुरागः। तया विना त्वहं प्राणानपि धारयितुं नोत्सहे। वैशम्पायनोऽप्यसंनिहितः पार्श्वे मे। किं करोम्येकाकी। कं पृच्छामि। केन वापरेण सह समानदुःखो भवामि', इत्येवं चिन्तयत एवास्य सा क्षपा दुःखदीर्घापि क्षयमगमत्।

प्रातरेव च किंवदन्तीं शुश्राव, यथा किल दशपुरं यावत्परागतः स्कन्धावारः' इति। 'परागतो द्वितीयं मे हृदयं वैशम्पायनः' इति प्रहर्षपरवशश्च प्रविशन्तमालोक्य दूरत एव कृतप्रणामं केयूरकमवादीत्–'केयूरक, करतलवर्तिनीं सिद्धिमधुनावधारय। प्राप्तो वैशम्पायनः' इति। स तु तदाकर्ण्य चिन्तयान्तःशून्य एवोपविश्य पार्श्वे संज्ञोत्सा-

रितसमस्तपरिजनं चन्द्रापीडं व्यज्ञपयत्–'देव, अवश्यं हि देवस्य देवीप्राप्त्या भवितव्यम्। केन कदावलोकितो ज्योत्स्नारहितश्चन्द्रमाः, कमलाकरो वा मृणालिकया विना, उद्यानभागो वा लताशून्यः। यादृशी चाकालक्षमा देव्याः शरीरावस्था तादृशी निवेदितैव मया। सर्वोऽपि प्रत्याशया धार्यते'। इति विज्ञापितश्चन्द्रापीडो देव्याः प्राणसंधारणाय केयूरकेण सह पत्रलेखां समेघनादां सकुमारसंदेशां च देवीपादमूलं व्यसर्जयत्। ततश्चन्द्रापीडो वैशम्पायनस्य प्रत्युद्गमनायात्मानं मोचयितुं पितुः पादमूलमयात्। तत्र तु शुकनाससमन्वितं तारापीडं सूनुविवाहं चिन्तयन्तं चन्द्रापीडो ददर्श। पश्चाच्चन्द्रापीडोऽपि शुकनासमुखेनैव वैशम्पायनप्रत्युद्गमनाय लब्धानुज्ञः प्रातर्गमनसंज्ञाशङ्खनादायादिदेश। दशपुरगामिना मार्गेण प्रावर्तत गन्तुम्। शीघ्रं च दृष्टवानसौ स्कन्धावारम्। दृष्ट्वा चाकरोच्चेतसि–'अहो, भद्रकं भवति, यदचिन्तितागमन एव प्रविश्य वैशम्पायनं पश्यामि, इति। एवं चिन्तयन्नसौ स्कन्धावारमाससाद। प्रविशंश्च प्रत्यावासकं वहन्नेव 'कस्मिन्प्रदेशे वैशम्पायनावासः' इति पृच्छन् प्रत्युत्तरं न लेभे। अग्रतो गत्वा सममेवावनमतां राजन्यसहस्राणां मुखान्यवलोक्य 'क्व वैशम्पायनः' इत्यपृच्छत्। ततश्च ते सर्वे सममेव 'अस्मिंस्तरुतलेऽवतरतु तावद्देवः। ततो यथावस्थितं विज्ञापयामः' इति न्यवेदयन्। चन्द्रापीडस्य तेन तेषां स्फुटाख्यानादपि कष्टतरेण वचसान्तःशल्यगर्भं स्फुटितमिव हृदयमासीत्। केवलं तत्कालप्रयणिनी मूर्च्छा सा धारणमकरोत्। उपलब्धसंज्ञोऽपि च वैशम्पायनस्यादर्शनादन्तर्द्रवन्निव दह्यमान इव स्फुटन्निव

सहस्रधा दुःखेन चकार चेतसि–'अहो मे रम्योऽप्यरमणीयः सवृत्तो जीवलोकः। उषितापि शून्योभूता पृथिवी। सचुक्षषोऽप्यन्धाः ककुभो जाताः। सुनिष्पन्नमपि हतं जन्म। सुरक्षितमपि मुषितं जीवितफलम्। कं परं पश्यामि। कमालपामि। कस्मै विश्रम्भं कथयामि। केन सह सुखमासे। किमद्य मे जीवितेन कादम्बर्यापि च। वैशम्पायनस्य कृते क कं पृच्छामि। कथं मया तातस्य शुकनासस्य चात्मा वैशम्पायनेन विना दर्शयितव्यः। इति रुदत्येव तस्मिंस्ते व्यज्ञपयन्–'देव, शान्तं पापम्। देवशरीरमिव साग्रं वर्षशतं ध्रियते वैशम्पायनः' इत्याकर्ण्य चोज्जीवित इवानन्दबाष्पनिर्भरो भूत्वा सविस्तरं तानपृच्छत्। ते चैवं पृष्टा व्यज्ञपयन्- 'देव, श्रूयतां यथावृत्तम्। स्कन्धावाराद्गते देवे वैशम्पायनोऽच्छोदसरसि स्नातुं गतः। तत्र चातिरम्यतयैव सर्वतो दत्तदृष्टिः संचरंस्तटलतामण्डपमद्राक्षीत्। दृष्ट्वा च तमतिचिरान्तरितदर्शनं भ्रातरमिव तनयमिव सुहृदमिव चानन्यदृष्टिर्विस्मृतनिमेषेण चक्षुषा विलोकयन् स्तंभित इव समुपविश्य भूमौ किमप्यन्तरात्मना स्मरन्निवानुध्यायन्निव निर्विकारवदनो रुदंस्तूष्णीमधोमुखस्तस्थौ। उपदिश्यमानोऽपि जड इव, मूक इव, अशिक्षित इव, वक्तुं न किञ्चिदपि प्रत्युत्तरमदात्। पुनः पुनश्चास्माभिरागमनायानुरुध्यमानोऽस्मान् परिच्छेदनिष्ठुरमाह स्म–'मया तु न यातव्यमस्मात्प्रदेशात्। गच्छन्तु भवन्तः स्कन्धावारमादाय। न युक्तं भवतां चन्द्रापीडभुजबलपरिरक्षितं गते तस्मिन्महासाधनं गृहीत्वास्यां भूमौ क्षणमप्यवस्थानं कर्तुम्' तत्सर्वं वृत्तान्तं श्रुत्वा चन्द्रापीडः

कटकलोकेन सहोज्जयिनीमाजगाम। समन्ताद्वैशम्पायनवृत्तान्तमेव शृण्वंश्चकार चेतसि–'बाह्यस्य तावज्जनस्येयमीदृशी समवस्था किं पुनर्येनासावङ्केन लालितः संवर्धितो वा बालचाटवोऽस्यानुभूताः। तदतिकष्टं मे वैशम्पायनेन विना तातस्य शुकनास्याम्बाया मनोरमाया वा दर्शनम्' इत्येवं चिन्तयन्नेव विवेशोज्जयिनीम्। अवतीर्य च यदा स राजभवनं प्रविशति तदा तातोऽम्बया विलासवत्या सह शुकनासभवनं गत इति शुश्राव। श्रुत्वा च निवृत्य तत्रैव जगाम। गच्छंश्च समीपवर्तीभूतो "हा वत्स वैशम्पायन, अद्यापि मदङ्कलालनोचितो बाल एवासि। कथं त्वमेकाकी व्यालशतसहस्रभीषणे निर्मानुषे तस्मिञ्शून्यारण्ये स्थितः। कस्त्वयि बुभुक्षिते तृषिते सुषुप्सति वा दुःखितो ममोत्सङ्गमुत्सृज्य। समानसुखदुःखा वधूरपि न पुत्रक, त्वयोपात्ता। तात, त्वयाहं शैशवेऽपि नावमानिता, कुतस्तवेयमेकपद एवेदृशी निष्ठुरता जाता। इति मनोरमां विलपन्तीमश्रौषीत्। दूरत एव पितरं प्रणम्योपविष्टं तारापीडो जलधर इवाभ्यधात्–'वत्स चन्द्रापीड, जानामि ते स्वजीवितादपि समभ्यधिकां भ्रातुरुपरि प्रीतिम्। पीडा च सुखैकहेतोर्वल्लभजनादसंभाव्या तथैव हि न किंचिन्न क्रियते। तज्जन्मनः स्नेहस्य वयसः शीलस्य श्रुतस्य विनयाधानस्य च सर्वस्यैवानुचितमिमं भ्रातुः सुहृदश्च ते वृत्तान्तमाकर्ण्य त्वद्दोषमाशङ्कते मे हृदयम्। इत्येवंवादिनो नरपतेर्वचनमाक्षिप्य शुकनासो ऽवदत् 'देव, यदि चन्द्रमस्यूष्मा, दहने चातिशीतलत्वम् अंशुमालिनि वा तमः, तमस्विन्यां वा दिवसः, महोदधौ वा शोषः, क्षितेरधारणं

वा शेषे, परार्थानुद्यमो वा साधोः, ततो युवराजे दोषः। तत्किमेवमेवानिरूप्य तस्यानात्मज्ञस्य मूढप्रकृतेर्दुर्जातस्य राजापथ्यकारिणो मातृपितृघातिनो मित्रद्रुहः कृतघ्नस्य कर्मचण्डालस्य महापातकिनः कृते गुणवन्तमत्युदारचरितं चन्द्रापीडमेवं संभावयति देवः। इत्युक्तवति शुकनासे

कशयेवान्तस्ताडितो दोषसंभावनयानया पितुरुद्बाष्प-दृष्टिरुपविष्ट एवोपसृत्य चन्द्रापीडः शनैः शनैः शुकना-समवादीत्–'आर्य, यद्यपि निरुक्तितो वेद्मि, न मदीयेन दोषेण नागतो वैशम्पायन इति, तथापि तातेन संभावित-मेव कस्य वापरस्य संभावना नोत्पन्ना। मिथ्यापि तत्तथा यथा गृहीतं लोकेन, विशेषतो गुरुणा। तदस्या दोषसंभा-वनायाः प्रायश्चितमार्यो दापयतु मे वैशम्पायनानयनाय गमनानुज्ञां तातेन। नान्यथा मे दोषशुद्धिर्भवति एवं पितृभ्यामनुज्ञातः स नगर्या निर्जगाम। वहंश्च त्रिभागमा-त्रावशिष्टे ऽध्वनि निवर्तमानं मेघनादमद्राक्षीत्।

दृष्ट्वा च दूरत एव कृतनमस्कारं तमप्राक्षीत्–'तिष्ठतु तावत्पुरस्तात्पत्रलेखागमनवृत्तान्तप्रश्नः। वैशम्पायनवृत्तान्त-मेव तावत्पृच्छामि। अयि, दृष्टस्त्वयाच्छोदसरसि वैशम्पा-यनः। पृष्टो वावस्थानकारणम्। पृष्टेन वा किञ्चित्कथितं न वा। पश्चात्तापी वास्मत्परित्यागेन। स्मरति वास्माकम्। मातापित्रोर्वा संदिष्टं किञ्चित्। आवेदितं वास्य मदीयमा-गनम्। नापयास्यति वा तस्मात्प्रदेशात्' इति। स एवं पृष्टो व्यज्ञपयत्–'देव, देवेन तु वैशम्पायनमालोक्यानुपदमेव तुरङ्गमैरागत एवाहम्' इत्यादिश्य विसर्जितोऽहम्। अच्छो-दसरसः प्रतीपं वैशम्पायनो गत इत्येषान्तरा वार्तैव नोप-

याता। जलदसमयारम्भमालोक्य कदाचित्कृतप्रयत्नोऽपि न मुच्यत एवागन्तुं देवश्चन्द्रापीडः 'इति हेतोर्बलान्निवर्तितो ऽस्मि' इत्यभिधाय विरराम। चन्द्रापीडोऽपि तदेवाच्छोदसरः प्राप्य सर्वानश्ववारानादिदेश। 'कदाचिदसौ वैलक्ष्यादस्मानालोक्यापसर्पेदिति चतुर्ष्वपि पार्श्वेष्ववहिता भवन्तु भवन्तः' इत्यात्मनापि तुरगगत एव खिन्नोऽप्यखिन्न इव विचिन्वंल्लतागहनानि वृक्षमूलानि शिलातलानि लसन्मण्डपांश्च समन्ताद्बभ्राम। भ्राम्यंश्च यदा न क्वचिदपि किञ्चिदवस्थानचिह्नमप्यद्राक्षीत्तदा चकार चेतसि–'सर्वथा विनष्टो ऽस्मि, न दृष्टा देवी कादम्बरी, नापि वैशम्पायनः कदाचिदस्य वृत्तान्तस्याभिज्ञा महाश्वेता भवेदिति तामेव तावत्पश्यामि'। इत्यवधार्य महाश्वेताश्रममुपजगाम। प्रत्यासन्ने च तस्मिन्गद्गदिकावगृह्यमाणकण्ठा महाश्वेतैवावादीत् –'महाभाग, किमियमावेदयति वराकी। यया कठिनहृदयया दुःखश्रवणार्हेऽपि दुःखमात्मीयं प्रथमं श्रावितम्। सैव मन्दभाग्या महाभाग, निर्लज्जा निर्घृणा च दुःश्रवणमपि श्रावयामि दुःखमिदम्। श्रूयताम्। केयूरकाद्भवद्गमनमाकर्ण्य विदीर्यमाणमनसा न मया चित्ररथस्य मनोरथः पूरितः, न मदिरायाः प्रार्थना कृता, नात्मनः समीहितं संपादितम्, न गृहाभ्यागतस्य चन्द्रापीडस्य प्रियमनुष्ठितम्, न चापि हृदयवल्लभसमागमनिर्वृता प्रियसखी कादम्बरी वीक्षितेत्युत्पन्नानेकगुणवैराग्या तपश्चरणकृतमतिर्यावदत्रागता तावद्भवत्तुल्याकृतिमुन्मुक्तमिवान्तःकरणेन प्रनष्टमिव किमपीतस्ततो विलोकयन्तं ब्राह्मणयुवानमपश्यम्। स तु मामुपसृत्यानन्यदृष्टिरदृष्टपूर्वोऽपि प्रत्यभिजानन्निव, असंस्तुतोऽपि

चिरपरिचित इव मां सुचिरमालोक्याब्रवीत्–'सुतनु, सर्व एव हि जगति जन्मनो वयस आकृतेर्वा सदृशमाचरन्न वचनीयतामेति। तव पुनरेकान्तवामप्रकृतेर्विधेरिव विसदृशानुष्ठाने कोऽयं प्रयत्नः। रूपवयसोरनुरूपेण सुमनोहारिणी लतेव रसाश्रयिणा फलेन कथं न संयोज्यते। यदि च त्वादृशी जीवलोकसुखेभ्यः पराङ्मुखी तपसा क्लेशयत्यात्मानं तदा वृथा वहति धनुरधिज्यं कुसुमधन्वा इति। अहं तु देवस्य पुण्डरीकस्यैव वृत्तान्तादपेतकौतुका सर्वथा तं वदन्तम् 'अपि कस्त्वम् कुतो वा समायातः' इति। पृच्छन्ती तरलिकामाहूयाब्रवम् यदि स न निवर्तेत तदा भद्रकं भविष्यति' इति एवं संदिश्य तया स निवारितोऽपि नात्याक्षीदेवानुबन्धम्। अतीतेषु केषुचिद्दिवसेष्वेकदा गाढायां यामिन्यां सुगृहीतनाम्नः पुण्करीकस्य तस्य च जीवद्रतस्य मित्रस्य स्मरन्ती जाग्रत्येवातिष्ठम्। तदा स निभृतं मामुपसृत्याब्रवीत्–'चन्द्रमुखि, यच्छरणगतपरित्राणं हि स तपस्विनामपि धर्म एव इति। तच्छ्रुत्वा जातमन्युरहमवदम्–' आः पाप, कथमेवं वदतो मामुत्तमाङ्गे, ते न निपतितं वज्रम्। येनैवं खलु शुक इव वक्तुं शिक्षितस्तेनैव विधात्रा किमुत तस्यामेव जातौ न निक्षिप्तोऽसि। भगवन्, परमेश्वर, यदि मया देवस्य दर्शनात्प्रभृति मनसाप्यपरः पुमान्न चिन्तितस्तदानेन मे सत्यवचनेनायमलीककामी मदुदीरितायामेव जातौ पततु इति। अनवसित एव मद्वचसि सोऽचेतनः क्षितावपतत्। अपगत जीवितेऽस्मिन्कृताक्रन्दा तत्परिजनाच्छ्रुतवती यथाऽसौ महाभागस्यैव मित्रं भवति' इत्युक्त्वा च अपावनमुखी महीं महीयसा-

श्रुवेगेन तूष्णीमेवाप्लावितवती। चन्द्रपीडस्य तु तदाकर्ण्य 'भगवति, कृतप्रयत्नायामपि भगवत्यामपुण्यभाजास्मिञ्जन्मनि न मया प्राप्तं देव्याः कादम्बर्याश्चरणपरिचर्यासुखम्, तज्जन्मान्तरेऽपि मे भगवती संपादयित्री भूयात्' इति गदत एव स्वभावसरसं हृदयमस्फुटत्।

अथ विदितवृत्तान्ता कादम्बर्यपि चन्द्रापीडदर्शनायोत्ताम्यन्ती तत्रैवाजगाम। आगत्य च सोन्मुक्तजीवितं चन्द्रापीडमद्राक्षीत्। दृष्टमात्र एव सा मूर्च्छां गता। तदनु लब्धसंज्ञाऽपि कादम्बरी तथैव मूढेवाविष्टेव स्तम्भितेव तस्थौ एवं मोहात्कष्टतरोऽभूत्तस्याः प्रबोधः। कुलद्वयरक्षणार्थं तरलिकयोपदिश्यमाना सा कादम्बरी विहस्याब्रवीत् 'अय्युन्मत्तिके, कुतोऽस्य मे वज्रसारकठिनस्य हतहृदयस्य स्फुटनम्। यन्नालोक्यैवं महस्रधा स्फुटितम्। अधुना तु मे सर्वदुःखानि दूरीभूतानि। अस्मिन्समये मरणमेव जीवितम्। जीवितं पुनर्मरणम्। एवं वदन्ती सा चन्द्रापीडशरीरं कराभ्यामुत्क्षिप्याङ्केन धृतवती। अथ तत्करस्पर्शेनोच्छ्वसत इव चन्द्रापीडदेहात्किमपि चन्द्रधवलं ज्योतिरिवोज्जगाम। अनन्तरं चान्तरिक्षे क्षरन्तीवामृतमशरीरिणी वागश्रूयत–'वत्से महाश्वेते, पुण्डरीकशरीरं मल्लोके मत्तेजसाप्यायमानमविनाशि भूयस्त्वत्समागमाय तिष्ठत्येव। इदमपरं मत्तेजोमयं स्वत एवाविनाशि विशेषतोऽमुना कादम्बरीकरस्पर्शेनाप्यायमानं चन्द्रापीडशरीरं शापदोषाद्विमुक्तमप्यन्तरात्मना कृतशरीरसंक्रान्तेर्योगिन इव शरीरमत्रैव भवत्योः प्रत्ययार्थमाशापक्षयादास्ताम्। नैतदग्निना संस्कर्तव्यम्। नोदके वा प्रक्षेप्तव्यम्' इति। तां तु श्रुत्वा

पत्रलेखावर्जं विस्मिताक्षिप्तहृदयः सर्व एव परिजनोऽतिष्ठत्। पत्रलेखा तु तेन तस्य ज्योतिषः स्पर्शेन लब्धसंज्ञा झटित्युत्थायेन्द्रायुधेन सहात्मानमच्छोदसरस्यक्षिपत्।

अथ तयोर्निमज्जनसमयानन्तरमेव तस्मात्सरसस्तापसकुमारकः सहसैवोदतिष्ठत्। उत्थाय च महाश्वेतामुपसृत्य शोकगद्गदमवादीत्–'गन्धर्वराजपुत्रि, जन्मान्तरादिवागतोऽपि प्रत्यभिज्ञायतेऽयं जनो न वा' इति। सा त्वेवं पृष्टा ससंभ्रममुत्थाय कृतपादवन्दना प्रत्यवादीत्–'भगवन्कपिञ्जल, कथं न प्रत्यभिजानामि त्वाम्। तत्कथय केनासौ पुण्डरीको नीतः किं वास्य वृत्तम्, किं वा तवोपजातम्, कुतो वा त्वमेकाकी देवेन विनागतः' इति। एवं पृष्टोऽसौ प्रत्यवादीत्–'गन्धर्वराजपुत्रि, श्रूयताम्। अहं हि त्वामेकाकिनीमुत्सृज्य वयस्यस्नेहादाबद्धपरिकरस्तमेव पुरुषमनुबध्नन्नवेनोदपतम्। स तु चन्द्रलोकं गतः। तत्र गत्वा महोदयाख्यायां सभायां महति पर्यङ्के तत्पुण्डरीकशरीरं स्थापयित्वा मामवादीत्–'कपिञ्जल, जानीहि मां चन्द्रमसम्। अहं तु जगदनुग्रहाय स्वव्यापारमनुतिष्ठन्ननेन ते मित्रेण निरपराधः संशप्तः 'दुरात्मन्निन्दुहतक, यथाहं त्वया करैः संतापित उत्पन्नरागः सन्नसंप्राप्तहृदयवल्लभासमागमसुखः प्राणैर्वियोजितस्तथा त्वमपि भारते वर्षे प्रतिजन्मैवोत्पन्नानुरागोऽसमाप्तसमागमसुखस्तीव्रतरां हृदयवेदनामनुभूय जीवितमुत्स्रक्ष्यसि' इति। मयापि त्वं मत्तुल्यदुःखसुख एव भविष्यसीति प्रतिशापस्तस्मै दत्तः। अपगतामर्षस्त्वहं महाश्वेताव्यतिकरमस्याधिगतवान्। तस्या हितायैव मयेदमुत्क्षिप्य समानीतम्। वत्सा च महाश्वेता समाश्वासिता। अधुना

त्वं गत्वैनं वृत्तान्तं श्वेतकेतवे निवेदय। महाप्रभावोऽसौ कदाचिदत्र प्रतिक्रियां काञ्चिदपि करोति' इत्युक्त्वा मां व्यसर्जयत्। अहं तु विना वयस्येन शोकावेगान्धो गीर्वाणवर्त्मनि धावन्नतिक्रोधनं वैमानिकमलङ्घयम्। स तु मां दहन्निव रोषारुणचक्षुषाब्रवीत्–'दुरात्मन्, मिथ्यातपोबलगर्वित, त्वयाहमुद्दामचारिणा तुरङ्गमेणेवोपलङ्घितस्तस्मात्तुरगो भूत्वा मर्त्यलोकेऽवतर' इति। एतन्निशम्य मयाभ्यर्थितोऽसौ पुनर्मामवादीत्–'यन्मयोक्तं तन्नान्यथा भवितुमर्हति। तदेतत्ते करोमि। कियन्तमपि कालं यस्यैव वाहनतामुपयास्यसि तस्यैवावसाने स्नात्वा विगतशापो भविष्यसि' इति। एवमुक्तस्तु पुनरहमवदम्–'भगवन्, यद्येवं ततो विज्ञापयामि। तेनापि मत्प्रियवयस्येन पुण्डरीकेण चन्द्रमसा सह शापदोषान्मर्त्यलोक एवोत्पत्तव्यम्। तदेतावन्तमपि भगवान्प्रसादं करोतु तु मे दिव्येन चक्षुषावलोक्य यथा तुरङ्गमत्वेऽपि मे तेनैव प्रियवयस्येन सहवियोगेन कालो यायात्' इति। स त्वेवमुक्तो मुहूर्तमिव ध्यात्वा पुनर्मामवादीत्–'अनया स्नेहलतया ते ममार्द्रीकृतं हृदयम्। उज्जयिन्यां तारापीडस्य राज्ञस्तनयतोपगन्तव्या चन्द्रमसा। वयस्येनापि ते पुण्डरीकेण तन्मन्त्रिण एव शुकनासनाम्नः। त्वमपि तस्य महोपकारिणश्चन्द्रात्मनो राजपुत्रस्य वाहनतामुपयास्यसि' इति। एतच्छ्रुत्वा 'हा देव पुण्डरीक, जन्मान्तरेष्वविस्मृतमदनुराग, देव, प्रसीद। कुरु दयाम्। देहि मे प्रतिवचनम्' इति प्रोच्य महाश्वेता कादम्बरीं सान्त्वयामास। सा तु निराहारा तमशेषं दिवसमक्षपयत्। क्षपामपि तथैव नीत्वा प्रातः कादम्बरी प्रफुल्लशतपत्राकारं

मनागप्यनुन्मुक्तं श्रिया तस्य वदनं पश्यन्ती जीवितं धारयामास। अन्येद्युश्चन्द्रापीडशरीराविनाशित्वे संजातदृढतरप्रत्यया स्वपित्रोस्तद्वृत्तान्तं निवेदितवती। तदा मदिराचित्ररथाभ्यां संदिष्टं यथा शापावसाने जामात्रा सहैवानन्दबाष्पनिर्भराननारविन्दं ते द्रक्ष्यावः' इति।

अथापगते जलदसमये युवराजश्चिरयतीत्युत्ताम्यता हृदयेन देवेन तारापीडेन देव्या विलासवत्यार्यशुकनासेन च वार्ताहराः प्रेषिताः। ते च कादम्बर्यनुज्ञाताः सर्वं वृत्तान्तं ज्ञात्वा चन्द्रापीडशरीरदर्शनं च कृत्वा मेघनादाहूतेन त्वरितकनाम्ना कुमारबालसेवकेन सह ततः प्रस्थिताः। कृता विदितवृत्तान्ता उज्जयिन्यां सर्वे जनास्त्वरितकेन। स्फुटितेऽपि हृदये शरीरेण ध्रियते युवराज इति विज्ञाय धृतधैर्यो बन्धुजनश्चन्द्रापीडदर्शनातुरः प्रयाणं चक्र उज्जयिन्याः। अच्छोदसरस्तीरं प्राप्य ते सर्वे वत्समुखं दिदृक्षवो महाश्वेताश्रममगमन्। महाश्वेता तु तच्छ्रुत्वा ह्रिया धावित्वा गुहाभ्यन्तरमविशत्। चित्ररथतनयापि सखीजनावलम्बितशरीरा मोहान्धकारमभजत्। तं तदवस्थं चन्द्रापीडं दृष्ट्वा माता विलासवती गलितधैर्या निर्भरं रुरोद। तारापीडो विलासवतीमेवं रुदतीमब्रवीत्–'यस्याः प्रभावात्पुनरनुभवनीयो वत्सस्य जीवितप्रतिलम्भाभ्युदयमहोत्सवः सैवेयं गन्धर्वराजतनया वधूस्तेऽद्यापि संज्ञां न लभते। तदेनां तावदुत्थाप्याङ्के कृत्वा चेतनां लम्भय। ततो यथेच्छं रोदिष्यसि' इत्यभिहिता विलासवती 'क्व सा मे वत्सस्य जीवितनिबन्धनवधूः' इत्यभिदधत्येव कादम्बरीं पाणिना हृदये स्पृशन्ती 'समाश्वसिहि मातः' इत्याश्वास्य 'आयुष्मति,

दीर्घकालमविधवा भव' इति दत्ताशीर्वादा तामधारयत्। अथैकान्तविध्वंसिषु संसारभावेष्वनास्थस्तारापीडोऽपि विरतिमुपेत्य समं देव्या शुकनासेन च तत्रैवातिष्ठत्। इतो जाबालिरपि 'योऽसौ वैशम्पायननामा शुकनाससूनुरभवत् स एवैष पुनः स्वयंकृतेनाविनयेन शुकजातौ पतितः' इत्युक्त्वा विरराम।

७. जाबालिप्रोक्तशुकवृत्तान्तसमाप्तेरूर्ध्वं कथावसानम्।

एतावता कालेन स्वमित्रस्य पितुः श्वेतकेतोर्विदितवृत्तान्तो निजमित्रान्वेषणाय जाबालेराश्रममभ्युपगतः। कपिञ्जलः। शुकस्तु तच्छ्रुत्वा तत्क्षणेनोत्पन्नपक्ष इवोत्पत्य तत्समीपमागत्य च कपिञ्जलमुवाच-'सखे कपिञ्जल, एवं जन्मद्वयान्तरितदर्शनमपि त्वां दृष्ट्वा किं किं न करोमीति जायते मे मनसि' इत्याकर्ण्य कपिञ्जलोऽवादीत्-'सखे पुण्डरीक, कुशलं तातस्य। आदिष्टा च तेन यथा प्रतिक्रिया कर्मपरिसमाप्तिपर्यन्तं स्थातव्यं वत्सेन जाबालेराश्रमे' इति वदन् स वैशम्पायनगात्राणि पाणिना परामृश्यान्तर्हृदयेनादूयत। तं दूयमानहृदयं वीक्ष्य सोऽवदत्-'किं दूयसे सखे कपिञ्जल, त्वयापि मन्दपुण्यस्य मम कृते तुरगतामापन्नेन पराधीनवृत्तिना बहुतराण्येव दुःखान्यनुभूतानि' इति वदन्तं तमापृच्छ्य निरगात्।

अथ वैशम्पायनः कतिपयैरेव दिवसैः संजातपक्षोऽभवत्। एकदा तु स चन्द्रापीडमहाश्वेते द्रष्टुकाम उत्तरां ककुभमगमत्। मार्गे च चाण्डालयोनिमापन्नया स्वमात्रा श्रिया मा भूदस्याधिकतरो विनिपात इति। वृक्षे निशि

स्वपन् ग्राहितः। स एव एष वैशम्पायनश्चन्द्रापीडस्य (शूद्रकरूपिणः) पुरत आनीतश्चाण्डालकन्यया। इति ज्ञात्वा राज्ञापि समुपजाताधिककुतूहलेन समाहूता चाण्डालकन्या तमुवाच-'भुवनभूषण, रोहिणीपते, तारारमण, कादम्बरीलोचनानन्दचन्द्र, सर्वस्त्वयास्य दुर्मतेरात्मनश्च पूर्वजन्मवृत्तान्तः श्रुत एव। अहं त्वस्य जननी श्रीः। शापावसानेन युवयोः सममेव सुखेन भवितव्यमिति त्वत्समीपमानीतो मयायम्।' इत्यभिदधानैव सा गगनमुदपतत्। अथ राज्ञस्तद्वचनमाकर्ण्य संस्मृतजन्मान्तरस्य कादम्बरीशरणमुपजगामान्तःकरणम्। राज्ञ इव तुल्यावस्थस्य पुण्डरीकात्मनो वैशम्पायनस्य च महाश्वेताशरणम्। कादम्बरी तु तमभिपद्य मुकुलितनयनपङ्कजा जीवन्तमिव निर्भरं कण्ठे जग्राह। अनेनामृतायमानस्पर्शेन स सुप्त इवोत्तस्थौ। तत्क्षणञ्च कण्ठेन महाश्वेतादत्तामेकावलीं धारयन् कपिञ्जलकरावलम्बी पुण्डरीकोऽप्युपस्थितः। एवं स्वदोषेण वियुक्ताः सर्वे पुनर्मिलिताः। संमिल्य च पुन र्न वियुज्यन्त इति को नियतं कथयति। एवं गच्छति काल एकदा कादम्बरी चन्द्रापीडमप्राक्षीत्-'आर्यपुत्र, सर्वे खलु वयं मृताः सन्तः प्रत्युज्जीविताः परस्परं संघटिताश्च। सा पुनर्वराकी पत्रलेखात्र न दृश्यते' इति पृष्टश्चन्द्रापीडः प्रत्यवादीत्-'प्रिये, सा हि खलु मां शप्तमुपश्रुत्य मच्चरणपरिचर्यायै मर्त्यलोके जन्माग्रहीत्। इतश्च मया गच्छता सा निवारिता पुनर्जन्मग्रहणात्' इति।

दशकुमारचरिते ।

१. राजवाहनजन्मकथा ।

अस्ति समस्तनगरीनिकषायमाणा मगधशेखरीभूता पुष्पपुरी नाम नगरी। तत्र निरवद्यरूपो राजहंसो नाम भूपो बभूव। तस्य वसुमती नाम महिष्यासीत्। तस्य राज्ञः परमविधेया धर्मपालपद्मोद्भवसितवर्मनामधेयास्त्रयः कुलामात्या अभूवन्। तेषां सितवर्मणः सुमतिसत्यवर्माणौ, धर्मपालस्य सुमन्त्रसुमित्रकामपालाः, पद्मोद्भवस्य सुश्रुतरत्नोद्भवाविति तनयाः समभूवन्। तेषु धर्मशीलः सत्यवर्मा संसारासारतां बुद्ध्वा तीर्थयात्राभिलाषी देशान्तरमगमत्। विटनटवारनारीपरायणो दुर्विनीतः कामपालो जनकाग्रजन्मनोः शासनमतिक्रम्य भुवं बभ्राम। रत्नोद्भवोऽपि वाणिज्यनिपुणतया पारावारतरणमकरोत्। इतरे मन्त्रिसूनवः पुरंदरपुरातिथिषु पितृषु यथापूर्वमन्वतिष्ठन्। ततः कदाचिन्मगधनायको मानसारं नाम मालवेश्वरं प्रति सङ्ग्रामाभिलाषेण रोषाविष्टो निर्ययौ। तत्र मगधराजो मालवराजं जीवग्राहं गृहीत्वा कृपालुतया पुनरपि स्वराज्ये प्रतिष्ठापयामास। ततः सोऽनन्यशासनामिलां शासदनपत्यतया नारायणमर्चयामास। तस्मिन्प्रसन्ने वसुमती दयितमनोरथपुष्पभूतं गर्भमधत्त। एकदा सभायां सिंहासनासीनोऽनुज्ञातप्रवेशं यतिं मन्दहासमभाषत–'ननु तापस, देशं सापदेशं भ्रमन्भवांस्तत्र तत्र भवदभिज्ञातं कथयतु' इति। तेनाभाषि–'देव, शिरसि देवस्याज्ञामादायैनं निर्दोषं वेषं स्वीकृत्य मालवेन्द्रनगरं प्रविश्य तत्र गूढतरं वर्तमानस्तस्य राज्ञः समस्तमु-

दन्तजातं विदित्वा प्रत्यागमम्। मानी मानसारः संपराये भवतः पराजयमनुभूय महाकालनिवासिनं महेश्वरं समाराध्य संतुष्टात्तस्मादेकवीराहवदां गदां लब्ध्वात्मानमप्रतिभटं मन्यमानो भवन्तमभियोक्तुमुद्युङ्क्ते। ततः परं देव एव प्रमाणम्' इति। तदालोचयन्नमात्यै राजा तैर्विज्ञापितोऽभूत्-'देव, निरुपायेन देवसहायेन योद्धुमरातिरायाति। तदस्माकं युद्धं सांप्रतमसांप्रतम्। सहसा दुर्गसंश्रयः कार्यः' इति तैर्बहुधा विज्ञापितोऽपि गर्वेण प्रतियोद्धुमना बभूव। शितिकण्ठदत्त-शक्तिसारो मानसारो योद्धुं मगधदेशं प्रविवेश। तदाकर्ण्य मन्त्रिणो मगधेन्द्रमनुनीय महाविकटविन्ध्याटवीमध्ये मूलबलरक्षितमवरोधं निवेशयामासुः। राजहंसस्तु निर्गत्या-धिकरुषं द्विषं रुरोध। मालवेन्द्रोऽपि मगधेश्वरस्योपरि पुरारातिदत्तां गदां प्राहिणोत्। सा तं राजहंसं मूर्च्छितम-कार्षीत्। ततो वीतप्रग्रहा अक्षतविग्रहा वाहा रथमादाया-न्तःपुरशरण्यं महारण्यं प्राविशन्। मालवनाथो मगधराज्यं प्राज्यं समाक्रम्य पुष्पपुरमध्यतिष्ठत्।

तत्र हेतिततिहतिश्रान्ता अमात्या अनुत्क्रान्तजीविता निशान्तवातलब्धसंज्ञा राजानमनवलोकितवन्तो दैन्यवन्तो देवीमवापुः। विदितवृत्तान्ता सानुगमने मतिं व्यधत्त। 'कल्याणि, अन्तर्वत्न्या मरणमनुचितमिति' विज्ञाप्यमानापि सेनानिवेशदेशं निभृतमतिक्रम्य यत्र रथस्य संसक्ततया तदानयनपलायनश्रान्ता गन्तुमक्षमाः क्षमापतिरथ्याः पूर्व-मतिष्ठंस्तस्य निकटवटतरोः शाखायां बन्धनं विरच्य मर्तुकामाभिरामा साश्रुकण्ठा व्यलपत्-'लावण्योपमितपुष्पसा-यक, भूनायक भवानेव भाविन्यपि जन्मनि वल्लभो मे

भवतु' इति। तदाकर्ण्य नीहारकरकिरणनिकरसंपर्कलब्धावबोधो मागधो देवीवाक्यमेव निश्चिन्वानस्तन्वानः प्रियवचनानि शनैस्तामाह्वयत्। सानन्दसंफुल्लवदनारविन्दा तमुपोषिताभ्यामिव लोचनाभ्यां पिबन्ती पिकस्वरेण स्वरेणामात्यादिजनमाहूय तेभ्यस्तमदर्शयत्। राजा प्रशंसितदैवमाहात्म्यैरमात्यैरभाणि–'देव, रथ्यचयः सारथ्यपगमे रथं रभसादरण्यमनयत्' इति। 'तत्र मालवपतिना प्रहितया गदया ताडितो मूर्च्छामागत्यात्र वने निशान्तपवनेन बोधितोऽभवम्' इति महीपतिरकथयत्। ततो मन्त्रिनिवहेनानुकूलकालेन शिबिरमानीय राजा विरोपितव्रणोऽकारि। पश्चाच्च मृदुभाषितया वसुमत्या मत्याकलितया च स समबोधि 'देव सकलस्य भूपालकुलस्य मध्ये तेजोवरिष्ठो गरिष्ठो भवानद्याटवीमध्ये निवसतीति जलबुद्बुदसमाना विराजमाना संपत्तडिल्लतेव सहसैवोदेति नश्यति च। तन्निखिलं दैवायत्तमेवावधार्यं कार्यम्। किं च पुरा हरिश्चन्द्रादयो महीन्द्रा दुःखमनुभूय बहुकालं निजराज्यमकुर्वन्' तथैव भवानपि भविष्यति। तस्मात्कंचन कालं विरचितदैवसमाधिस्तिष्ठतु तावत्' इति। ततः सकलसैन्यसमन्वितो राजहंसो वामदेवनामानं तपोधनं निजाभिलाषावाप्तिसाधनं जगाम। तं प्रणम्य कथितकथ्यस्तदाश्रमं कंचनकालमध्युष्य निजराज्याभिलाषी सोमकुलावतंसो राजहंसो मुनिमभाषत 'भगवन्, मानसारो दैवबलेन मां निर्जित्य मद्भोग्यं राज्यमनुभवति। तद्वदहमप्युग्रं तपो विरच्य तमरातिमुन्मूलयिष्यामि भवत्कारुण्येनेति नियमवन्तं भवन्तं प्राप्नवम्' इति। त्रिकालज्ञस्तपोधनो राजानमवोचत् 'सखे, शरीरकार्श्यकारिणा

तपसालम्। आ वसुमतीप्रसूतेः कंचन कालं तूष्णीमास्स्व' इति। गमनचारिण्यापि गिरा सत्यमेतत्' इति तदैवावाचि।

ततः संपूर्णगर्भदिवसा वसुमती सुमुहूर्ते सकललक्षण लक्षितं सुतमसूत। पुरोधसं पुरस्कृत्य महीपतिः कुमारं बालसंस्कारेण विराजमानं राजवाहननामानं व्यधत्त। तस्मिन्नेव काले सुमतिसुमित्रसुमन्त्रसुश्रुतानां मन्त्रिणां प्रमतिमित्रगुप्तमन्त्रगुप्तविश्रुताख्या महदभिख्याः सूनवः समजायन्त। राजवाहनो मन्त्रिपुत्रैः सह बालकेलीःकुर्वन्नवर्धत।

२. उपहारवर्मप्राप्तिः।

अथ कदाचिदेकेन तापसेन रसेन राजलक्ष्मी विराजितं कञ्चिन्नयनानन्दकरं सुकुमारं कुमारं राज्ञे समर्प्यावाचि- 'भूवल्लभ, कुशसमिदानयनाय वनं गतेन मया काचिदशरण्या व्यक्तकार्पण्याश्रु मुञ्चन्ती वनिता विलोकिता। 'निर्जने वने किं निमित्तं रुद्यते त्वया' इति पृष्टा सा करसरोरुहैरश्रु प्रमृज्य सगद्गदं मामवोचत्-'मुने, लावण्य जितपुष्पसायके मिथिलानायके कीर्तिव्यापृतसुधर्मणि निजसुहृदो मगधराजस्य सीमन्तिनीसीमन्तमहोत्सवाय पुत्रदारसमन्विते पुष्पपुरमुपेत्य कञ्चन कालमधिवसति समाराधितगिरीशो मालवाधीशो मगधराजं योद्धुमभ्यगात्। तत्र प्रख्यातयोरेतयोरसंख्ये संख्ये वर्तमाने सुहृत्साहाय्यकं कुर्वाणो निजबले सति विदेहे विदेहेश्वरः प्रहारवर्मा जयवता रिपुणाभिगृह्य कारुण्येन पुण्येन च विसृष्टो हतावशेषेण शून्येन सैन्येन सह स्वपुरगमनमकरोत्। ततो वनमार्गेण दुर्गेण गच्छन्नधिकबलेन शबरबलेन रभसादभिहन्यमानो मूलबलाभिरक्षितावरोधः स महानिरोधः पला-

यिष्ट। तदीयार्भकयोर्यमयोर्धात्रीभावेन परिकल्पिताहं मद्दु-हितापि तीव्रगतिं भूपतिमनुगन्तुमक्षमे अभूव। तत्र विवृतवदनः कोऽपि रूपी कोप इव व्याघ्रः शीघ्रं मामाघ्रा-तुमागतवान्। भीताहमुदग्रग्राविण स्खलन्ती पर्यपतम्। मदीयपाणिभ्रष्टो बालकः कस्यापि कपिलाशवस्य क्रोडम-भ्यलीयत। तच्छवाकर्षिणोऽमर्षिणो व्याघ्रस्य प्राणान्बाणो बाणासनयन्त्रमुक्तोऽपाहरत्। विलोलालको बालकोऽपि शबरैरादाय कुत्रचिदुपानीयत। कुमारमपरमुद्वहन्ती मद्दुहिता कुत्र गतेति न जाने। साहं मोहं गता केनापि कृपालुना वृष्णिपालेन स्वकुटिरमावेश्य विरोपितव्रणाभवम्। ततः स्वस्थीभूय भूयः क्ष्माभर्तुरन्तिकमुपतिष्ठासुरसहायतया दुहितुरनभिज्ञाततया च व्याकुली भवामि' इत्यभिदधाना 'एकाकिन्यपि स्वामिनं गमिष्यामि' इति सा तदैव निरगात्। अहमपि भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषाद-मनुभवंस्तदन्वयाङ्कुरं कुमारमन्विष्यंस्तदैकं चण्डिकामन्दिरं सुन्दरं प्रागाम्। तत्र संततमेवं विधविजयसिद्धये कुमारं देवतोपहारं करिष्यन्तः किराताः महीरुहशाखावलम्बित-मेनमसिलतया वा, अनेकचरणैः पलायमानं कुक्कुरबालकैर्वा दंशयित्वा संहनिष्यामः' इति भाषमाणा मया समभ्यभा-ष्यन्त–'ननु किरातोत्तमाः, घोरप्रचारे कान्तारे स्खलितपथः स्थविरभूसुरोऽहं मम पुत्रकं कचिच्छायायां निक्षिप्य मार्गान्वेषणाय किंचिदनन्तरमगच्छम्। स कुत्र गतः, केन वा गृहीतः, परीक्ष्यापि न वीक्ष्यते। तन्मुखावलोकनेन विनानेकान्यहानि व्यतीतानि। किं करोमि, क यामि, भवद्भिर्न किमदर्शि' इति। 'द्विजोत्तम, कश्चिदत्र तिष्ठति।

किमेष तव नन्दनः सत्यमेव? तदेनं गृहाण' इत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरन्। तेभ्यो दत्ताशीरहं बालकमङ्कीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य निःशङ्कं भवदङ्कं समानीतवानस्मि। एवमायुष्मन्तं पितृरूपो भवानभिरक्षतात्' इति। राजा सुहृदापन्निमित्तं शोकं तन्नन्दनविलोकनसुखेन किंचिदधरीकृत्य तमुपहारवर्मनाम्नाहूय राजवाहनमिव पुपोष।

३–४. अपहारवर्मपुष्पोद्भवप्राप्तिः।

जनपतिरेकस्मिन्पुण्यदिवसे तीर्थस्नानाय पक्कणनिकटमार्गेण गच्छन्नबलया कयाचिदुपलालितमनुपमशरीरं कुमारं कंचिदवलोक्य कुतूहलाकुलस्तामपृच्छत्–'भामिनि, रुचिरमूर्तिः सराजगुणसंपूर्तिरसावर्भको भवदन्वयसंभवो न भवति कस्य नयनानन्दनः? निमित्तेन केन भवदधीनो जातः कथ्यतां याथातथ्येन त्वया' इति। प्रणतया तया शबर्या सलीलमलापि–'राजन्, आत्मपल्लीसमीपे पदव्यां वर्तमानस्य शक्रसमानस्य मिथिलेश्वरस्य सर्वस्वमपहरति शबरसैन्ये मद्दयितेनापहृत्य कुमार एष मह्यमर्पितो व्यवर्धत' इति। तदवधार्य कार्यज्ञो राजा मुनिकथितं द्वितीयं राजकुमारमेव निश्चित्य सामदानाभ्यां तामनुनीयापहारवर्मेत्याख्याय देव्यै 'वर्धय' इति समर्पितवान्।

कदाचिद्वामदेवशिष्यः सोमदेवशर्मा नाम कंचिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत–'देव, रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि–'स्थविरे,

का त्वम्? एतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसि?' इति। वृद्धयाप्यभाषि-'मुनिवर, कालयवननाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति। तन्नन्दिनीं नयनानन्दकारिणीं सुवृत्तां नामैतस्माद्द्वीपादागतो मगधनाथमन्त्रिसंभवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रान्तभूवलयो मनोहारी व्यवहार्युपयम्य सुवस्तुसंपदा श्वशुरेण संमानितोऽभूत्। कालक्रमेण नताङ्गी गर्भिणी जाता। ततः सोदरविलोकनकुतूहलेन रत्नोद्भवः कथंचिच्छ्वशुरमनुनीय चपललोचनयानया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे। कल्लोलमालाभिहतः पोतः समुद्राम्भस्यमज्जत्। गर्भभरालसां तां ललनां धात्रीभावेन कल्पिताहं कराभ्यामुद्वहन्ती फलकमेकमारुह्य दैवगत्या तीरभूमिमगमम्। सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि। क्लेशस्य परां काष्ठामधिगता सुवृत्तास्मिन्नटवीमध्येऽद्य सुतमसूत। प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति। विजने वने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निधाय गन्तुमनुचितमिति कुमारोऽप्यानायि' इति। तस्मिन्नेव क्षणे वन्यो वारणः कश्चिददृश्यत। तं विलोक्य भीता सा बालकं निपात्य प्राद्रवत्। अहं समीपलतागुल्मके प्रविश्य परीक्षमाणोऽतिष्ठम्। निपतितं बालकं पल्लवकवलमिवाददाने गजपतौ कण्ठीरवो भीमरवो महाग्रहेणन्यपतत्। भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपतत्। चिरायुष्मत्तया स चोन्नततरुशाखासमासीनेन वानरेण

केनचित्पक्कफलबुद्ध्या परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्तोऽभूत्। सोऽपि शाखामृगः क्वचिदगात्। बालकेन सत्त्वसंपन्नतया सकलक्लेशसहेनाभावि। केसरिणा करिणं निहत्य कुत्रचिदगामि। लतागृहान्निर्गतोऽहमपि तेजःपुञ्जं बालकं शनैरवनीरुहादवतार्य वनान्तरे वनितामन्विष्याविलोक्यैन मानीय गुरवे निवेद्य तन्निदेशेन भवन्निकटमानीतवानस्मि' इति। सर्वेषां सुहृदामेकदैवानुकूलभावेन महदाश्चर्यं बिभ्राणो राजा 'रत्नोद्भवः कथमभवत्' इति चिन्तयंस्तन्नन्दनं पुष्पोद्भवनामधेयं विधाय तदुदन्तं व्याख्याय सुश्रुताय विषादसंतोषावनुभवंस्तदनुजतनयं समर्पितवान्।

५—६. अर्थपालसोमदत्तप्राप्तिः ॥

अन्येद्युः कञ्चन बालकमुरसि दधती वसुमती वल्लभमभिगता। तेन 'कुत्रत्योऽयम्' इति पृष्टा समभाषत—'राजन्, अतीतायां रात्रौ काचन दिव्यवनिता मत्पुरतः कुमारमेनं संस्थाप्य निद्रामुद्रितां मां विबोध्य विनीताब्रवीत्—'देवि, त्वन्मन्त्रिणो धर्मपालनन्दनस्य कामपालस्य वल्लभा यक्षकान्ताहं तारावली नाम, नन्दिनी मणिभद्रस्य। यक्षेश्वरानुमत्या मदात्मजमेतं भवत्तनूजस्याम्भोनिधिवलयवेष्टितक्षोणीमण्डलेश्वरस्य भाविनो विशुद्धयशोनिधे राजवाहनस्य परिचर्याकरणायानीतवत्यस्मि। त्वमेनं मनोजसंनिभमभिवर्धय इति। विस्मितविकसितनयनया मया सविनयं सत्कृता स्वक्षी यक्षी साप्यदृश्यतामयासीत्' इति। कामपालस्य यक्षकन्यासङ्गमे विस्मयमानमानसो राजहंसो रञ्जितमित्रं सुमित्रं मन्त्रिणमाहूय तदीयभ्रातृपुत्रमर्थपालं विधाय तस्मै सर्वं वार्तादिकं व्याख्यायादात्।

ततः परस्मिन्दिवसे वामदेवान्तेवासी समाराधितदेव-कीर्तिं निर्भर्त्सितमारमूर्तिं कुसुमसुकुमारं कुमारमेकमवगमय्य नरपतिमवादीत्–'देव, तीर्थयात्राप्रसङ्गेन कावेरीतीरमागतोऽहं विलोलालकं बालकं निजोत्सङ्गतले निधाय रुदतीं स्थविरामेकां विलोक्यावोचम्–'स्थविरे, का त्वम्, अयमर्भकः कस्य नयनानन्दकरः, कान्तारं किमर्थमागता, शोककारणं किम्' इति। सा करयुगलेन बाष्पजलमुन्मृज्य निजशोकशङ्कूत्पाटनक्षममिव मामवलोक्य शोकहेतुमवोचत्–'द्विजात्मज, राजहंसमन्त्रिणः सितवर्मणः कनीयानात्मजः सत्यवर्मा तीर्थयात्रामिषेण देशमेनमागच्छत्। स कस्मिंश्चिदग्रहारे कालीं नाम कस्य चिद्भूसुरस्य नन्दिनीं विवाह्य तस्या अनपत्यतया गौरीं नाम तद्भगिनीं काञ्चनकान्तिं परिणीय तस्यामेकं तनयमलभत। काली सासूयमेकदा धात्र्या मया सह बालमेनं केनापि मिषेणानीय तटिन्यामेतस्यामक्षिपत्। करेणैकेन बालमुद्धृत्यापरेण प्लवमाना नदीवेगागतस्य कस्यचित्तरोः शाखामवलम्ब्य तत्र शिशुं निधाय नदीवेगेनोह्यमाना केनचित्तरुलग्नेन कालभोगिनाहमदंशिषि। मदवलम्बीभूतो भूरुहोऽयमस्मिन्देशे तीरमगमत्। गरलस्योद्दीपनतया मयि मृतायामरण्ये कश्चन शरण्यो नास्तीति मया शोच्यते' इति। ततो विषमविषज्वालावलीढावयवा सा धरणीतले न्यपतत्। दयाविष्टहृदयोऽहं मन्त्रबलेन विषव्यथामपनेतुमक्षमः समीपकुञ्जेष्वौषधिविशेषमन्विष्य प्रत्यागतो व्युत्क्रान्तजीवितां तां व्यलोकयम्। तदनु तस्याः पावकसंस्कारं विरच्य शोकाकुलचेता बालमेनमगतिमादाय सत्यवर्मवृत्तान्तश्रवणवेलायां तन्निवासाग्रहारनामधेयस्या-

श्रुततया तदन्वेषणमशक्यमित्यालोच्य भवदमात्यतनयस्य भवानेवाभिरक्षितेति भवन्तमेनमनयम्' इति। तन्निशम्य सत्यवर्मस्थितेः सम्यगनिश्चिततया खिन्नमानसो नरपतिः सुमतये मन्त्रिणे सोमदत्तं नाम तदनुजतनयमर्पितवान्। सोऽपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष।

७. द्विजोपकृतिकरणम्

अथैकदा वामदेवः कुमारनिकरेण परिवेष्टितं राजानमानतशिरसमभिगम्य कुमारचयं गाढमालिङ्ग्य विहिताशीरभ्यभाषत—'भूवल्लभ, नूनं भवत्पुत्रस्य दिग्विजयारम्भसमय एषः। तदस्य सर्वक्लेशसहस्य राजवाहनस्य दिग्विजयप्रयाणं क्रियताम्' इति। राजवाहनोऽपि पित्रानुज्ञातो मङ्गलसूचकं शुभशकुनं विलोकयन् देशं कंचिदतिक्रम्य विन्ध्याटवीमध्यमविशत्। तत्र हेतिहतिकिणाङ्कं कालायसकर्कशकायं यज्ञोपवितेनानुमेयविप्रभावं किरातरूपं कमपि पुरुषं ददर्श। तेन विहितपूजो राजवाहनोऽभाषत—'ननु मानव, निर्जने मृगहिते घोरप्रचारे कान्तारे भवानेकाकी किं निवसति? भवदंसोपगतं यज्ञोपवीतं भूसुरभावं द्योतयति। हेतिहतिभिः किरातरीतिरनुमीयते। कथय किमेतत्' इति। 'तेजोमयोऽयं मानुषमात्रपौरुषो नूनं न भवति' इति मत्वा तस्मै निजवृत्तान्तमकथयत् 'राजनन्दन, केचिदटव्यामस्यां वेदाध्ययनमपहाय कुलाचारं दूरीकृत्य सत्यादिधर्मव्रातं परिहृत्य किल्बिषमन्विष्यन्तः पुलिन्दपुरोगमास्तदन्नमुपभुञ्जाना बहवो ब्राह्मणब्रुवा निवसन्ति, तेषु कस्यचित्पुत्रो मातङ्गनामाहं सह किरातबलेन जनपदं प्रविश्य धनिनो जनान् बन्धने

निधाय तेषां सकलद्रव्यजातमपहरन् वीतदयो व्यचरम्। एकदैकस्मिन्कान्तारे मदीयसहचरगणेन जिघांस्यमानं भूसुरमेकमवलोक्य दयायत्तचित्तोऽब्रवम्–'ननु पापाः, न हन्तव्यो ब्राह्मणः' इति। ते रोषारुणनयना मां बहुधा निरभर्त्सयन्। तदनु तैः सह चिरं प्रयुध्य तैरभिहतो गतजीवितोऽभवम्। ततः प्रेतपुरीमुपेत्य तत्र रत्नखचितसिंहासनासीनं शमनं विलोक्य तस्मै दण्डप्रणाममकरवम्। सोऽपि मामवेक्ष्य चित्रगुप्तमाहूय तमवोचत्–'सचिव, नैषोऽमुष्य मृत्युसमयः। निन्दितचरितोऽप्ययं महीसुरनिमित्तं गतजीवितोऽभूत्। इतः प्रभृति विगलितकल्मषस्यास्य पुण्यकर्मकरणे रुचिरुदेष्यति। पापिष्ठैरनुभूयमानमत्र यातनाविशेषं विलोक्य पुनरपि पूर्वशरीरमनेन गम्यताम्' इति। चित्रगुप्तस्तदनुरोधेन नानाप्रकारं यातनाविशेषं दर्शयित्वा पुण्यबुद्धिं चोपदिश्य माममुञ्चत्। तदेव पूर्वशरीरं प्राप्य शीतलोपचारं रचयन् महीसुरो मां शिलायां शायितवान्। तदनु विदितोदन्तो मदीयबन्धुजनः सहसागत्य मन्दिरमानीय मामपक्रान्तव्रणमकरोत्। तदारभ्याहं किरातसंसर्गमुत्सृज्येन्दुकलावतंसं चेतसि स्मरन्नस्मिन्कानने वसामि। एकदा राजन्, अतीते निशान्ते गौरीपतिः स्वप्नसंनिहितो मां विबोध्य प्रसन्नवदनकान्तिः प्रश्रयानतं मामवोचत्–'मातङ्ग, दण्डारण्यान्तरालगामिन्यास्तटिन्यास्तीरभूमौ स्फटिकलिङ्गस्य पश्चाददिपतिकन्यापदपङ्क्तिचिह्नितस्याश्मनः सविधे विधेराननमिव किमपि बिलं विद्यते। तत्प्रविश्य तत्र निक्षिप्तं ताम्रशासनं समादाय विधिं तदुपदिष्टं च विधाय पाताललोकाधीश्वरेण भवता भवितव्यम्। भवत्साहाय्यकरो राजकुमारोऽद्य श्वो वा

समागमिष्यति ' इति। तदादेशानुगुणमेव भवदागमनमभूत्। साधनाभिलाषिणो मम तोषिणो रचय साहाय्यम् ' इति। 'तथा' इति राजवाहनः सार्कं मातङ्गेन नमितोत्तमाङ्गेन विहायार्धरात्रे मित्रगणं वनान्तरमवाप। तदनु तदनुचराः कल्ये साकल्येन राजकुमारमनवलोकयन्तो निश्चितपुनःसंगम संकेतस्थानाः परस्परं वियुज्य ययुः।

लोकैकवीरेण कुमारेण रक्ष्यमाणो मातङ्गोऽपि बिलं निःशङ्कं प्रविश्य गृहीतताम्रशासनो रसातलं पथा तेनैवोपेत्य तत्र कस्यचित्पत्तनस्य निकटे कासारस्य समीपे हविषा होमं विरच्य प्रत्यूहपरिहारिणि सविस्मयं विलोकयति राजवाहने समिदाज्यसमुज्ज्वलिते ज्वलने पुण्यगेहं देहमाहुतीकृत्य तडित्समानकान्ति दिव्यां तनुमलभत। तदनु काचन दिव्यकन्यकागत्यावनिसुरोत्तमाय मणिमेकमुज्ज्वलाकारमुपायनीकृत्य तेन 'का त्वम् ' इति पृष्टा सोत्कण्ठा कलकण्ठस्वनेन मन्दं मन्दमुदञ्जलिरभाषत–'भूसुरोत्तम, अहमसुरोत्तमनन्दिनी कालिन्दी नाम। मम पितास्य लोकस्य शासिता महानुभावो विष्णुना दूरीकृतामरे समरे यमनगरातिथिरकारि। तद्वियोगशोकमग्नां मां कोपि सिद्धतापसोऽभाषत–'बाले, कश्चिद्दिव्यदेहधारी मानवस्तव वल्लभो भूत्वा रसातलं पालयिष्यति' इति। तदादेशं निशम्य घनशब्दोन्मुखी चातकीव तवालोकनकाङ्क्षिणी चिरमतिष्ठम्। भवदागमनं चावगम्यामात्यानुमत्या भवन्तमागच्छम् 'लोकस्यास्य राजलक्ष्मी मङ्गीकृत्य मां सपत्नीं करोतु भवान्' इति। मातङ्गोऽपि राजवाहनानुमत्या तां तरुणीं परिणीय रसातलराज्यमुररीकृत्य परमानन्दमाससाद।

राजवाहनस्तदवलोकनकौतूहलो भुवं जिगमिषुः कालिन्दीदत्तं क्षुत्पिपासादिक्लेशनाशनं मणिं साहाय्यकरणसंतुष्टान्मातङ्गकाल्लब्ध्वा कञ्चनाध्वानमनुवर्तमानं तं विसृज्य बिलपथेन निर्ययौ। तत्र च वयस्यगणमनवलोक्य भुवं बभ्राम। भ्रमंश्चान्दोलिकारूढं रमणीसहितमेकदोद्याने समागतमेकं पुरुषमपश्यत्। सोऽपि पल्लवितचेताः 'मम स्वामी राजवाहन एषोऽकाण्ड एवास्य पादमूलं गतवानस्मि। संप्रति महान्नयनोत्सवो जातः' इति ससंभ्रममान्दोलिकाया अवतीर्य तस्य चरणकमलं मौलिना पस्पर्श। प्रमोदाश्रुपूर्णो राजा पुलकिताङ्गं तं गाढमालिङ्ग्य 'अये सौम्य सोमदत्त' इति व्याजहार। ततो राजवाहनादिष्टः सोमदत्तः सविनयमात्मीयप्रचारप्रकारमवोचत्।

८. सोमदत्तचरितम्।

'देव, भवच्चरणसेवाभिलाषीभूतोऽहं भ्रमन्नेकस्यां वनावनौ पिपासाकुलो नदसलिलं पिबन् रत्नमेकमद्राक्षम्। तदादायाम्बरमणेरत्युष्णतया गन्तुमक्षमो देवायतनं प्रविष्टो दीनाननं बहुतनयसमेतं स्थविरमहीसुरमवलोक्य कुशलमुदितदयोऽहमपृच्छम्। कार्पण्यविवर्णवदनो महाशापूर्णमानसो ऽवोचदग्रजन्मा-'महाभाग, सुतानेतान् मातृहीनाननेकैरुपायै रक्षन्निदानीमस्मिन् कुदेशे भैक्ष्यं संपाद्य ददरतेभ्यो वसाम्यत्र' इति। 'भूदेव, एतत्कटकाधिपती राजा कोऽस्य देशस्य, किंनामधेयः, किमत्रागमनकारणमस्य' इति पृष्टोऽभाषत महीसुरः-'सौम्य, मत्तकालो नाम लाटेश्वरो देशस्यास्य पालयतुर्वीरकेतोस्तनयां वामलोचनां नाम तरुणीरत्नमसामान्यलावण्यं श्रावंश्रावमवधूतदुहितृप्रार्थनस्य तस्य नगरी-

मरौत्सीत्। वीरकेतुरपि भीतो महदुपायनमिव तनयां मत्तकालायादात्। तरुणीलाभहृष्टचेता लाटपतिर्गच्छन्निजदेशं प्रति संप्रति मृगयादरेणात्र वने सैन्यवासमकारयत्। कन्यासारणे नियुक्तो मानपालो नाम वीरकेतुमन्त्री मानधनश्चतुरङ्गबलसमन्वितोऽन्यत्र रचितशिबिरस्तं निजनाथावमानखिन्नमानसोऽन्तर्बिभेद' इति। विप्रोऽसौ दानयोग्य इति तस्मै करुणापूर्णमना रत्नमदाम्। अभिहितानेकाशीः कुत्रचिदग्रजन्मा जगाम। अध्वश्रमखिन्नेन मया तत्र निरवेशि निद्रासुखम्। तदनु पश्चान्निगडितबाहुयुगलः स भूसुरः कशाघातचिह्नितगात्रोऽनेकनैस्त्रिंशिकानुयातोऽभ्येत्य माम् 'असौ दस्युः' इत्यदर्शयत्। परित्यक्तभूसुरा राजभटा रत्नावाप्तिप्रकारं मदुक्तमनाकर्ण्य भयरहितं मां गाढं नियम्य रज्जुभिरानीय कारागारम् 'एते तव सखायः' इति निगडितान्कांश्चिन्निर्दिष्टवन्तो मामपि निगडितचरणयुगलमकार्षुः। किंकर्तव्यतामूढेन निराशङ्केशानुभवेनावाचि मया–'ननु वीर्यपुरुषाः, निमित्तेन केन निर्विशथ कारावासदुःखं दुस्तरम्। यूयं वयस्या इति निर्दिष्टमेतैः, किमिदम्' इति। तथाविधं मामवेक्ष्य भूसुरान्मया श्रुतं लाटपतिवृत्तान्तं व्याख्याय चोरवीराः पुनरवोचन्–'महाभाग, मानपालस्य किंकरा वयम्। तदाज्ञया लाटेश्वरमारणाय रात्रौ सुरङ्गद्वारेण तदगारं प्रविश्य तत्र राजाभावेन विषण्णा बहुधनमाहृत्य महाटवीं प्राविशाम। अपरेद्युश्च पदान्वेषिणो राजानुचरा अभ्येत्यास्मान्परितः परिवृत्य दृढतरं बद्ध्वा निकटमानीय समस्तवस्तुशोधनवेलायामेकस्यानर्घ्यरत्नस्याभावेनास्मद्वधाय माणिक्यादानाय वास्मान्किलाशृङ्खलयन्' इति।

श्रुतरत्नदृष्टरत्नावलोकनस्थानोऽहम् 'इदं तदेव माणिक्यम्' इति निश्चित्य भूदेवदाननिमित्तां दुरवस्थामात्मनो जन्म नामधेयं युष्मदन्वेषणपर्यटनप्रकारं चाभाष्य समयोचितैः संलापैर्मैत्रीमकार्षम्। ततोऽर्धरात्रे तेषां मम च शृङ्खलाबन्धनं निर्भिद्य तैरनुगम्यमानो निद्रितस्य द्वाःस्थगणस्यायुधजालमादाय पुररक्षान्पुरतोऽभिमुखागतान्पटुपराक्रमलीलयाभिद्राव्य मानपालशिबिरं प्राविशम्। मानपालो निजकिंकरेभ्यो मम कुलाभिमानवृत्तान्तं तत्कालीनं विक्रमं च निशम्य मामार्चयत्। परेद्युर्मत्तकालेन प्रेषिताः केचन पुरुषा मानपालमुपेत्य 'मन्त्रिन्, मदीयराजमन्दिरे धनमपहृत्य चौरा भवदीयं कटकं प्राविशन्। तानर्पय। नो चेन्महाननर्थः संभविष्यति' इति क्रूरतरं वाक्यमब्रुवन्। तदाकर्ण्य रोषारुणितनेत्रो मन्त्री 'लाटपतिः कः, तेन मैत्री का, अस्य पुनर्वराकस्य सेवया किं लभ्यम्' इति तान्निरभर्त्सयत्। ते च मानपालोक्तं मत्तकालाय तथैवाकथयन्। कुपितो लाटपतिर्दोर्वीर्यगर्वेणाल्पसैनिकसमेतो योद्धुमभ्यगात्। पूर्वमेव कृतरणनिश्चयो मानी मानपालः संनद्धयोधो निःशङ्कं निरगात्। अहमपि सबहुमानं मन्त्रिदत्तानि बहुलतुरंगमोपेतं चतुरसारथिं रथं च दृढतरं कवचं मदनुरूपं चापं च विविधबाणपूर्णं तूणीरद्वयं रणोचितान्यायुधानि च गृहीत्वा युद्धसंनद्धो रिपूद्धरणोद्युक्तं मन्त्रिणमन्वगाम्। परममत्सरेण तुमुलसंगरकरमुभयसैन्यमतिक्रम्य समुल्लसद्भुजाटोपेन बाणवर्षं तदङ्गे विमुञ्चन्नरातीन्प्राहरम्। ततोऽतिरयतुरंगमं मद्रथं तन्निकटं नीत्वा शीघ्रलङ्घनोपेततदीयरथोऽहमरातेः शिरःकर्तनमकार्षम्। तस्मिन्पतिते तदवशिष्टसैनिकेषु पला-

यितेषु सर्वं वस्तुजातमादाय परमानन्दसंनतो मन्त्री ममानेकविधां संभावनामकार्षीत्। मानपालप्रेषितात्तदनुचरादेनमखिलमुदन्तजातमाकर्ण्य संतुष्टमना राजाभ्युद्गतो मदीयपराक्रमे विस्मयमानो निजतनयां मह्यमदात्। ततो वामलोचनयानया सह नानाविधं सौख्यमनुभवन् सिद्धादेशेन सुहृज्जनावलोकनफलं प्रदेशं महाकालनिवासिन आराधनाय पत्नीसमेतः समागतोऽस्मि। भक्तवत्सलस्य गौरीपतेः कारुण्येन त्वत्पदारविन्दसंदर्शनानन्दसंदोहो मया लब्धः' इति।

९. गोमिनीवृत्तान्तम्।

पुनरनुयुक्तो मित्रगुप्तो गोमिनीचरितमाख्यातवान्–'अस्ति द्रविडेषु काञ्ची नाम नगरी। तस्यामनेकसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत्। सोऽष्टादशवर्षदेशीयश्चिन्तामापेदे–'नास्त्यदाराणामननुगुणदाराणां वा सुखं नाम। तत्कथं नु गुणवद्विन्देयं कलत्रम्' इति। अथ परप्रत्ययाहृतेषु दारेषु यादृच्छिकीं संपत्तिमनभिसमीक्ष्य कार्तान्तिको नाम भूत्वा वस्त्रान्तपिनद्धशालिप्रस्थो भुवं बभ्राम। 'लक्षणज्ञोऽयम्' इत्यमुष्मै कन्याः कन्यावन्तः प्रदर्शयांबभूवुः। यां कांचिल्लक्षणवतीं सवर्णां कन्यां दृष्ट्वा स किल स्म ब्रवीति–'भद्रे, शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नमस्मानभ्यवहारयितुम्' इति। स हसितावधूतो गृहाद्गृहं प्रविश्याभ्रमत्। एकदा तु शिबिषु कावेरीतीरपत्तने सह पितृभ्यामवसितमहर्धिमवशीर्णभवनसारां धात्र्या प्रदर्श्यमानां कांचन विरलभूषणां कुमारीं ददर्श। अस्यां संसक्तचक्षुश्चातर्कयत्–'अस्याः खलु कन्यायाः सर्व एवावयवा नातिस्थूला नातिकृशा नातिह्रस्वा नातिदीर्घाः। सेयमाकृतिर्न व्यभि-

चरति शीलम्। आसज्जति च मे हृदयमस्यामेव। तत्परीक्ष्यैनामुद्वहेयम्। अविमृश्यकारिणां हि नियतमनेका आपतन्त्यनुशयपरम्पराः' इति। स्निग्धदृष्टिराचष्ट–'भद्रे, कच्चिदस्तिकौशलं शालिप्रस्थेन संपन्नमाहारमस्मानभ्यवहारयितुम्' इति। ततस्तया वृद्धदासी साकूतमालोकिता। तस्मात्प्रस्थमात्रं धान्यमादाय तान् गन्धशालीन् विशोष्यातपे मुहुर्मुहुः परिवर्त्य स्थिरसमायां भूमौ नालीपृष्ठेन मृदुमृदु घट्टयन्ती तुषैरखण्डैस्तण्डुलान्पृथक् चकार। जगाद च धात्रीम्–'मातः, एभिस्तुषैरर्थिनो भूषणमृजाक्रियाक्षमैः स्वर्णकाराः, तेभ्य इमान् दत्वा लब्धाभिः काकिणीभिः स्थिरतराण्यनत्यार्द्राणि नातिशुष्काणि काष्ठानि मितंपचां स्थालीमुभे शरावे चाहर' इति। तथाकृते तयोलूखले मुसलेन चतुरललितक्षेपणायासितभुजमसकृदङ्गुलीभिरुद्धृत्योद्धृत्यावहत्य शूर्पशोधितांस्तण्डुलानसकृदद्भिः प्रक्षाल्य क्वथितपञ्चगुणे जले प्राक्षिपत्। समपक्केषु सिक्थेषु तां स्थालीमधोमुखीमवातिष्ठिपत्। अन्तःसाराणीन्धनान्यम्भसा समभ्युक्ष्य कृष्णाङ्गारीकृत्य तदर्थिभ्यो लोहकारेभ्यो प्राहिणोत्। एवं तया शाकं घृतं दधि तैलमामलकं चिञ्चाफलं चानाय्य प्रसाधिते भोजने स्नानाय विज्ञापितोऽसौ दत्ततैलामलकः सस्नौ। स्नातः सिक्तमृष्टे कुट्टिमे फलकमारुह्याङ्गणकदलीपत्रस्योपरिनिहितस्वादुशाल्योदनमभुङ्क्त। अथ नवभृङ्गारसंभृतमभिनवकुसुमवासितमच्छं पानीयमाकण्ठं पपौ। शिरःकम्पसंज्ञावारिता च पुनरपरकरकेणाचमनमदत्त कन्या। वृद्धया तु तदुच्छिष्टमपोह्य हरितगोमयोपलिप्ते कुट्टिमे स्वमेवोत्तरीयं कर्पटं व्यवधाय क्षणमशेत। परितुष्टश्च विधिवदुपयम्य कन्यां

निन्ये। नीत्वा चैतदनपेक्षः काममपि गणिकामवरोधमकरोत्'। धिगेतादृशं नरं यः कन्यागुणानपेक्षमाणोऽपि स्वयं शीलं व्यभिचरति।

हितोपदेशे।

पुरा किल शूद्रकराजधान्यां वीरवरो नाम महाराजपुत्रः कुतश्चिद्देशादागत्य राजद्वारमुपगम्य प्रतीहारमुवाच-'अहं तावद्वेतनार्थी राजपुत्रः। राजदर्शनं कारय।' ततस्तेनासौ राजदर्शनं कारितो ब्रूते-'देव, यदि मया सेवकेन प्रयोजनमस्ति तदास्मद्वेतनं क्रियताम्।' शूद्रक उवाच-'किं ते वर्तनम्।' वीरवरो ब्रूते-'प्रत्यहं सुवर्णपञ्चशतानि देहि।' राजाह-'का ते सामग्री।' वीरवरो ब्रूते-"द्वौ बाहू तृतीयश्च खड्गः।" राजाह-'नैतच्छक्यम्।' तच्छ्रुत्वा वीरवरश्चलितः। अथ मन्त्रिभिरुक्तम्-'देव, दिनचतुष्टयस्य वर्तनं दत्त्वा ज्ञायतामस्य स्वरूपं किमुपयुक्तोऽयमेतावद्वेतनं गृह्णात्यनुपयुक्तो वेति।' ततो मन्त्रिवचनादाहूय वीरवराय ताम्बूलं दत्त्वा पञ्चशतानि सुवर्णानि दत्तानि। तद्विनियोगश्च राज्ञा सुनिभृतं निरूपितः। तदर्धं वीरवरेण देवेभ्यो ब्राह्मणेभ्यो दत्तम्। स्थितस्यार्धं दुःखितेभ्यः। तदवशिष्टं भोज्यविलासव्ययेन। एतत्सर्वं नित्यकृत्यं कृत्वा राजद्वारमहर्निशं खड्गपाणिः सेवते। यदा च राजा स्वयं समादिशति तदा स्वगृहमपि याति।

अथैकदा कृष्णचतुर्दश्यां रात्रौ राजा सकरुणं क्रन्दनध्वनिं शुश्राव। शूद्रक उवाच-'कः कोऽत्र द्वारि।' तेनोक्तम्-'देव, एषोऽहं किं करवाणीति वदन् देवपादानां किंकरो

वीरवरः।' राजोवाच–'क्रन्दनानुसरणं क्रियताम्।' वीरवरः–'यथाज्ञापयति देवः' इत्युक्त्वा चलितः। राज्ञा च चिन्तितम्–'नैतदुचितम्। अयमेकाकी राजपुत्रो मया सूचीभेद्ये तमसि प्रेरितः। तदनु गत्वा किमेतदिति निरूपयामि।' ततो राजापि खड्गमादाय तदनुसरणक्रमेण नगराद्बहिर्निर्जगाम। गत्वा च वीरवरेण रुदती रूपयौवनसंपन्ना सर्वालंकारभूषिता काचित्स्त्री दृष्टा। पृष्टा च–'का त्वम्। किमर्थं रोदिषि।' स्त्रियोक्तम्–'अहमेतस्य शूद्रकस्य राजलक्ष्मीः। चिरादेतस्य भुजच्छायायां महता सुखेन विश्रान्ता। इदानीमन्यत्र गमिष्यामि।' वीरवरो ब्रूते–'यत्रापायः संभवति तत्रोपायोऽप्यस्ति। तत्कथं स्यात्पुनरिहावलम्बनं भवत्याः।' लक्ष्मीरुवाच–'यदि त्वमात्मनः पुत्रं शक्तिधरं द्वात्रिंशल्लक्षणोपेतं भगवत्याः सर्वमङ्गलाया उपहारीकरोषि तदाहं पुनरत्र सुचिरं निवसामि' इत्युक्त्वादृश्यतां ययौ।

ततो वीरवरेण स्वगृहं गत्वा निद्रायमाणा स्ववधूः प्रबोधिता पुत्रश्च। तौ निद्रां परित्यज्योत्थायोपविष्टौ। वीरवरस्तत्सर्वं लक्ष्मीवचनमुक्तवान्। तच्छ्रुत्वा सानन्दः शक्तिधरो ब्रूते–'धन्योऽहमेवंभूतः स्वामिराज्यरक्षार्थं यन्ममोपयोगः श्लाघ्यः। तत्कोऽधुना विलम्बस्य हेतुः। एवंविधे कर्मणि देहस्य विनियोग एषणीयः। यतो वरं परार्थे प्राणत्यागो विनाशे नियते सति।' तन्माता चोवाच–'यद्येतन्न कर्तव्यं तत्केनाप्यन्येन कर्मणा महावर्तनस्य निष्क्रयो भविष्यति।' इत्यालोच्य सर्वे सर्वमङ्गलायाः स्थानं गताः। तत्र सर्वमङ्गलां संपूज्य वीरवरो ब्रवीति–'देवि, प्रसीद। विजयतां विजयतां शूद्रको महाराजः। गृह्यतामुपहारः।' इत्युक्त्वा पुत्रस्य

शिरश्चिच्छेद। ततो वीरवरश्चिन्तयामास–'गृहीतराजवर्तनस्य निस्तारः कृतः। अधुना निष्पुत्रस्य जीवनेनालम्।' इत्यालोच्यात्मनः शिरश्छेदः कृतः। ततः स्त्रियापि स्वामिपुत्रशोकार्तया तथैव कृतम्। तत्सर्वं दृष्ट्वा राजा साश्चर्यं चिन्तयामास–'अहो धन्योऽहं यस्यैतादृशः किंकरः। यत्सत्यमनेन सदृशो लोके न भूतो न भविष्यति। तदीदृशं सेवकं विहाय राज्येन किं मे प्रयोजनम्।' ततः शूद्रकेणापि स्वशीर्षं छेत्तुं खड्गः समुत्थापितः। अथ भगवत्या सर्वमङ्गलया राजा हस्ते धृत उक्तश्च–'पुत्र, प्रसन्नास्मि ते। अलमेतादृशं साहसमवलम्ब्य। जीवनान्तेऽपि तव राज्यभङ्गो नास्ति।' राजा च साष्टाङ्गपातं प्रणिपत्योवाच–'देवि, किं मे राज्येन। को वा जीवितेन मेऽर्थः। यदि कथमप्यहमनुकम्पनीयो भवत्यास्तदा ममायुःशेषेणायं सदारपुत्रो वीरवरो जीवतु। अन्यथाहं यथाप्राप्तां गतिं गमिष्यामि।' भगवत्युवाच–'पुत्र, अनेन सत्त्वोत्कर्षेण भृत्यवात्सल्येन च तव संतुष्टास्मि। गच्छ, विजयी भव। अयमपि सपरिवारो राजपुत्रः पुनः प्राणान्प्राप्नोतु।' इत्यभिधाय देवी तिरोबभूव। ततो वीरवरः सपुत्रभार्यो गृहं गतः। राजापि तैरलक्षितः सत्वरमवरोधं प्राविशत्।

अथ प्रभातायामेव रजन्यां वीरवरो द्वारस्थः पुनर्भूपालेन पृष्टः सन्नाह–'देव, सा रुदती मामवलोक्यादृश्याभवत्। न काप्यन्या वार्ता विद्यते।' तद्वचनमाकर्ण्य राजा त्वचिन्तयत्–'कथमयं श्लाघ्यो महासत्त्वः। यतः स शूरोऽप्यविकत्थनः।' स राजा पश्चात्छिष्टसभां कृत्वा सर्ववृत्तान्तं प्रस्तुत्य प्रसादात्तस्मै कर्णाटराज्यं ददौ।

२. अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती। तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म–'यद्ययं केनाप्युपायेन म्रियते तदास्माकमेतद्देहेन मासचतुष्टयस्य भोजनं भविष्यति।' तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम्–'मया बुद्धिप्रभावादस्य मरणं साधयितव्यम्।' अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा प्रणत्योवाच–'देव, दृष्टिप्रसादं कुरु।' हस्ती ब्रूते–'कस्त्वं? कुतः समायातः?' सोऽवदत्–'जम्बुकोऽहं सर्ववनवासिभिः पशुभिर्मिलित्वा भवत्सकाशं प्रस्थापितः। यद्विना राज्ञावस्थातुं न युक्तं तदत्राटवीराज्येऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपितः। तद्यथा लग्नवेला न विचलति तथा सत्वरमागम्यतां देवेन' इत्युक्त्वोत्थाय चलितः। ततोऽसौ राज्यलोभाकृष्टः कर्पूरतिलको गोमायुवर्त्मना धावन्महापङ्के निमग्नः। ततस्तेन करिणोक्तम्–'सखे शृगाल, किमधुना विधेयम्। पङ्के निपतितोऽहं म्रिये। परावृत्य पश्य।' जम्बूकेन विहस्याभिहितम्–'देव, मम पुच्छकावलम्बनं कृत्वोत्तिष्ठ। यन्मद्विधस्य वचसि त्वया प्रत्ययः कृतस्तदनुभूयतामशरणं दुःखम्।' ततो महापङ्के निमग्नो द्विरदः शृगालैर्विदारितः शनैः शनैश्च भक्षितः।

नाहं जानामि केयूरे नाहं जानामि कुण्डले।
नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात्॥

Translation into Sanskrit

Ex. 1:— The boy drinks water. The man calls his son. Gopal brings heaps of money from the village. A Wise man knows the vanity of the world. A Cat eats mice. Men walk with their feet. The bull scratches the hill with his horns. Rama goes to the village with two servants. They come from the village with fruits in their hands. Nothing is praiseworthy but God; nothing is censurable but sin. We owe much respect to God. He becomes angry with his servant for his carelessness. A just king does not punish the innocent. Rama always likes diligent pupils. By night the stars shine in the sky, by day they disappear. The smell of flowers in the garden is fragrant. God does not like sin, and punishes all sinners. The father expects respect from his sons. Soldiers obey their general. In summer the sun becomes very hot. Govind's friends rejoice at his prosperity.

Ex. 2:—(Passive voice) The bird is not seen by the traveller. The work is done by Hari with the help of Gopal. Our actions are

known by the great God. We are always seen by God. The water of the tank is drunk by thirsty travellers. The goats are taken to the villages by Rama. The teacher's orders are not heard by rude pupils. All kings are called here for the choice-marriage of Damayanti. The warrior kills his enemies in a battle with arrows. There is peace in the country of the Vangas. The thieves kill travellers on the road. The king defeats the two Kings of Videh & Magadh. There are two tigers on the mountain. He carried the goat on his shoulder. He stands on a mountain. They two sprinkle water to trees. A devotee praises (स्तु) God.

Ex. 3:—(Participles & gerunds) He was asked by Lakshmana to give (दा) back his money. Having abandoned Sita in the forest Lakshmana returned to Ayodhya. Having brought the boy home he went away. Pramila fighting with Arjuna defeated the warrior. Having heard the dreadful news the women fainted away. Learn to forgive even your enemies. The two female servants trembling with fear did not speak even a word. The ugly girl was espoused (उत्+वह्) by the lame man. Having said (प्र+वच्) so he sat down. The king, when

extolled, gave much wealth to the poet. Yamuna remembering the virtues of her son began to weep. The warrior, defeated in the battle, was found and taken a prisoner.

Ex. 4:—(2nd. conju.) The cow eats (अद्) green grass. Children, do not weep (रुद्), here comes your mother with fruits in her hand. What books do you study (अधि + इ) in the school? You reprove him with harsh words, but he praises (स्तु–नु–ईड्) you. They sleep (स्वप्) for a long time by day. Sit (आस्) down here boys! I shall tell (चक्ष्) you an amusing story. Do you know (विद्) that Janasthan is situated on the Godavari? I have no hold (ईश्) on my body. Pupils lie down (शी) in cottages. The hand that rocks the cradle rules (शास्) the world. He wishes (वश्) for a great boon. Hari surpassed (अति+शी) Parshurama in bravery and intelligence. Sumitra gave birth (प्र+सू) to two sons. Fish do not long respire (प्र+अन्) in shallow water. The commentator explains (वि+आ+चक्ष्) the meaning of the sutra.

Ex. 5:— (3rd. conju.) They give (दा) money to every beggar that goes (हा A.) to their house. Are you not ashamed (ह्री) to proclaim your merits with your own tongue?

The woman put on (परि+धा) gold ornaments on her person. Do not give (दा) money to the undeserving, poor as they are. Darkness fears (भी) the sun. A pious brahmin first washes (अव+निज् his hands and feet and then begins religious ceremonies. Some people say (अभि+धा) that the shrutis command (वि+धा) the remarriage of widows. Lakshman abandoned (परि+हा) Sita, advanced in pregnancy, in a forest. The Shesha bears (भृ) the burden of the universe on his head. Boys! attend (अव+धा) to what I tell you now. If you shut (अपि+धा) your eyes you cannot safely reach home. Hermits fill (पृ-पॄ) their gourds with water. Measure (मा) the strength of your opponent. The smoke rose (उत्+हा) high in the sky.

Ex. 6:—(7th. Conju.) He sits near the fire and kindles (इन्ध्) it with a blow-pipe. We usually dine (भुज्) twice a day, but some people dine even thrice. You broke (भञ्ज्) the earthen jar made by the potter. The forces of Chandragupta laid siege to Suvarnapura & captured it. I went to the deer and quickly cut off his bonds. Chandarava, being pained by the remembrance of his sinful deeds, did not enjoy (भुज्) happiness. Mothers first anoint

their babies with oil and then bathe them with hot water. A teacher particularizes the several kinds of difficulties in the way of study. Why do you prevent us giving money to those helpless persons? If anybody comes to your house, first ask him what he wants. Let subjects manifest their love towards the king. Do not eat this fruit, it is full of worms. Empty the pot and fill it with sesamum seeds. They appointed me to the post of a councellor and said, "May not thou long enjoy it." The deer said to the mouse, "cut off my bonds and set me free."

Ex. 7:—(Perfect) On finding out his lost son, he became much delighted. (2) Several thieves entered my house and stole away all valuable things. (3) The demons marched (अभि+द्रु) to the hermitages of the Rishis and tortured (क्लिश्) the inmates. (4) Govind played with his friends and his teacher beat (प्र+हृ) and censured him. (5) They two never obstructed (रुध्) you doing your duty. (6) Yajnadatta composed (प्र+नी) a work, which soon became well-known. (7) The servants shut the door of the house and then slept. (8) Many flowers dropped down (स्रंस्) from branches of trees.

(9) They promised (प्रति+श्रु) to do the work, but they were unable to do it. (10) The warriors threw arrows at their enemies and wounded (व्यध्) many of them. (11) Rama sent (प्र+हि) Maruti to Lanka and told (आ+दिश्) him to find out Sita. (12) The two friends of the queen went (हा) to the garden and collected (सम्+चि) flowers. (13) The servants fastened (बन्ध्) the calf to a post and then milked the cow. (14) The sea being agitated, no fisherman dared (धृष्) go to catch fish. (15) Sita purified (पू) the family of Janaka by her birth. (16) The pupils studied (अधि+इ) their lessons and the teacher permitted (अनु+ज्ञा) them to go home.

Ex. 8:—The buffaloes went (इ) to the river and plunged (गाह्) into its water. (2) The Gods, tormented by Ravana, went (उप+गम्) to Vishnu and thus praised (स्तु) him. (3) The mother gave birth (प्र+सू) to twins but they soon died (मृ). (4) The God was pleased (प्र+सद्) with the man's penance and said (अभि+धा) to him, "Choose a gift." (5) He cut down (लू) the tree and then fell down (स्खल्). (6) They killed (हन्) many soldiers in battle. (7) They ate (अद्) all the fruits that the servants bought (क्री) in the market. (8) The five Pandvas married (परि+नी)

one wife and Sita married only Rama. (9) The king ruled (ईश्) his kingdom justly. (10) When they awoke (जागृ) they took (आ+दा) their books and began (आ+रभ्) to study. (11) It was so said (वि+आ+हृ) by him. (12) He set out (प्र+स्था) on an auspicious day. (13) The servants wandered (भ्रम्) over the whole earth. (14) They deserved (अर्ह्) the loyalty of their subjects. (15) The men sat (अधि+आस्) on the ground. (16) This story was told (कथ्–गद्) to me by my sister's husband. (17) How many days did they dwell (वस्) at Manipura? (18) They two put on (वस्) new clothes. (19) The boy became afraid of (भी) the tiger, but was saved (त्रै) by his mother.

Ex. 9:—(Futures & conditional) Will you go (इ) to the garden and bring Malti flowers for me? (2) None will trust (श्रद्+धा) a liar's word, even though his word be true. (3) Shakuntala said to Dushyanta, "When will your Majesty send (वि+सृज्) a messenger to take me to your capital?" (4) I will remember (स्मृ) with gratitude the favour now done to me. (5) But surely they will defeat (परा+जि) him. (6) A heavenly voice said, "Thou wilt die (मृ) on the next Vaishakha full-moon day.' (7) "At

the command of my father I shall throw (क्षिप्) myself into a fire or even drink poison and die," so said Rama to Kaikeyi. (8) If thy father had been here (सन्निधौ भू) to day, he would have given thee (प्र+दा) to this worthy guest. (9) Had this news been communicated (नि+वेदय) to me two days before, the prince's life would have been saved (त्रै.) (10) If the first husband does not appear here (प्र+पद्) before day-break another will be chosen (वृ) by her. (11) Do not send this boy to the market, he will be deceived (वञ्च्) by anybody. (12) If the ring had been found (प्र+आप्) at the proper time, Dushyanta would not have cast off (प्रति +आ+दिश्) Shakuntala advanced in pregnancy. (13) When this picture will be seen (दृश्) by experts, the painter will be praised (स्तु). (14) We shall stay (स्था Pass.) here for long. (15) Had you helped me he would have been soon killed (हन्). (16) These thieves will be taken (नी) to the court and punished according to their crimes.

Ex. 10:—Rama had two sons. (2) I saw four birds and three women (3) He studied three Vedas. (4) Draupadi married five husbands. (5) Bhrama had four heads (शीर्ष). (6)

You have twelve books. Give me eight of them. (7) He has twenty one houses. (8) Rama gave (दक्षिणा) to 42 brahmins, 4 virgins & 96 students. (9) He lived in 84 houses. (10) Rama married only once, but Krishna married often. (11) He performs Sandhya thrice a day. (12) Parshurama killed warrior-caste twenty one times. (13) He reads stories four times a month. (14) He eats fruits one by one. (15) He feeds cows by hundreds. (16) I am able to do this work in seven ways. (17) He cut his enemy's body into two pieces. (18) He died in 1939 A. D. (19) I am the fourth in the family. (20) She stands 48th. in the class. (21) I am almost twelve years old and I am also twelfth. (22) She stands 60th. in the class of 100 pupils. (23) Youth, affluence, power, and indiscretion are each meant for an evil, what to speak where all the four are combined? (24) The price of this book is 1½ rupees. (25) How many boys are there? Twenty three. (96) There are as many women as there are jugs. (27) He gave 11 rupees to the second Woman (28) विजयादशमी comes nine days after the first of आश्विन।

Ex. 11:—I am younger than Hari, but Hari is oldest of all the eight. (2) Baroda is

nearer than Poona. (3) Bombay is at a greater distance than Broach. (4) The Ganges is the longest and broadest of all Indian rivers. (5) The Himalayas is the highest mountain on the face of the earth. (6) To Yayati Sharmishtha was dearer than Devayani. (7) He reads better than I. (8) I can walk more quickly than Rama. (9) He is very old. (10) The stone is harder than wood. (11) Shirish flower is the softest of all flowers. (12) Brahma is finer than even an atom and greater than the great. (13) He speaks to one of the three. (14) He speaks to one of the two. (15) Out of many Brahmins invited, he gave dakshina only to one. (16) He sees further than I. (17) She is bolder than her sister.

Ex. 12:—(Compounds) *Rama and Lakshaman* were the two sons of Kaushalya. (2) He washes his *hands and feet*. (3) *Rama, Lakshaman, Bharat, and Shatrughna* were the four sons of Dashrath. (4) He believes in the *service of the great*. (5) He rendered *great service* to the country. (6) I saw a *great serpent*. (7) The prince passed through the street, *first watered and then swept*. (8) No body sips the milk first drunk and then vomitted. (9) He has *three or*

four sons. (10) He *has a broad chest.* (11) Gods *have their abode in heaven.* (12) He lives *on fruit, roots and others.* (13) He walks *along the Ganges.* (14) He sits *in the centre of the assembly.* (15) He goes begging *to every house.* (16) Every one does *according to his capacity.* (17) He stands *behind Hari.* (18) Locusts, when they fly *to the sea*, die in water. (19) The just king punishes the culprit *in accordance with his crime.* (20) Bow *to one whose wife is Uma.* (21) He rambled in a forest *with a strung bow.* (22) She is a *childless* lady. (23) One, *who has lost his wealth*, loses also *the hope of life.* (24) He enjoys *happiness of another world.* (25) They two passed on the way smelling fragrance *imitating their own breath.* (26) Sita alighted from the chariot *whose horses were held back.* (27) Through the favour of Rama Sita became a shelter of the distressed women *whose husbands were assailed by demons.*

Ex. 13:—My Lord, in the course of my pilgrimage to holy places I arrived at the bank of the Kaveri. There I happened to see an old lady with a baby on her lap. As she was weeping, I asked her, "Old dame, who are you and whose son is this?" She wiped off her

tears with her lotus-like hands and cast a glance at me. Thinking that I could remove the cause of her distress, she replied "I am bitten by a serpent and the virulent poison will very soon cause my death. I am lamenting, because there is none in this lonely forest to take care of this child after my death." With these words she fell dead on the ground.

Ex. 14:—A traveller hired a donkey to convey him to a distant place. As it was very hot, the traveller stopped to rest and sought shelter under the shadow of the donkey. As this afforded protection for one only and as the traveller and the owner of the donkey both claimed it, a violent dispute arose between them as to which of them had the better right to it. The quarrel proceeded from words to blows, and while the men fought, the donkey galloped off.

Ex. 15:—A buffalo once trod unknowingly on the tail of a mouse which was lying asleep in its path. The mouse jumped up in a great rage, and running up the buffalo's leg, got on to its back and kept on biting the huge animal until it was too tired to bite any longer. It then went along to the buffalo's ear, and

shouted. "You trod on my tail, and that is why I give you such a severe biting. You thoroughly deserved your punishment." But the buffalo replied. "I am very sorry I trod on your tail, but I did not know that I have done so any more than I knew that you had bitten me."

Ex. 16:—In the meanwhile the wicked Duryodhana was living happliy in his kingdom. One day *he was advised to go to the* forest. There he *wanted to see* the Pandavas, and show them all his *glory*. The Pandavas were poor hermits; he was a great king. This *pleased* Duryodhana much. He and his *party set out* to see the Pandavas. On the way they met the heavenly Gandharvas. They *quarrelled* and *fought* with them. But they *were defeated* and *made prisoners*. Then the servants of Duryodhana sent a messenger to Yudhisthira. They begged him for help. Yudhisthira was so kind-hearted that he now forgave his enemy Duryodhana and sent his brothers to help him. The Pandavas defeated the Gandharvas and freed Duryodhana.

Ex. 17:—Long long ago, there lived a king named shuddhodana, and his queen Maya.

A beautiful son was born to them; they named him Siddhartha. He was very carefully brought up by his father, who called together all the wisest men to teach him all that a prince should know. Siddhartha soon grew very learned, so that his teachers could teach him no more. Yet, he never grew vain, and always treated his teachers with reverence, and his companions with gentleness and affection. Truly it is said the learning brings forth humility, and humility alone gives fitness. Let learning grow from more to more yet more of reverence in us dwell.

Ex. 18:—Once a heavenly damsel, with a golden pot on her head, went to the Ganges to fetch holy water for the lord of gods. While walking on the sandy bank, she stumbled. Some swans, proud of their gait, laughed at her. She at once repaired to Indra, and with eyes full of tears complained to him of the insolence of the swans. Thereupon, the thousand-eyed god cursed the swans that had laughed. They turned black in colour, with a very harsh note and clumsy gait. This is the origin of the crows.

Ex. 19:—A mouse that dwelt near the

abode of a great magician was kept in such constant distress by its fear of a cat that the magician taking pity on it, turned it into a cat itself. Immediately it began to suffer from the fear of the dog, so that the magician turned it into a dog. Then it had the fear of a tiger, and the magician in *disgust* said, 'Be a mouse again. As you have only the heart of a mouse, it is impossible to change your nature by giving you the body of a noble animal.' The poor creature again became a mouse.

Ex. 20:—Two women once went to a market, each carrying on her head a heavy basket of fruit to sell. The one murmured all the way, but the other only laughed. The first, thereupon, vexedly said: "How can you go on laughing so? Your basket is as heavy as mine and you are not a bit stronger." "Oh!" said the other, "I have a certain little plant that I put on the top of my load; it makes it extremely light." "Indeed;" said the lazy one, "I wish I could lighten my load with it. Where does it grow? What is its name?" "It grows" replied the other, "wherever you plant it. Its name is Patience."

Ex. 21:—One very hot summer, when all the *springs* and *brooks* were dry, a fox *looked*

about all day in vain for water to drink. He even crept slyly into a farm yard; but the dog saw him, and he had to leave in hurry. At last, he thought of an old well in the middle of a field near the farm and to it he set off with all speed. When he came to it, he found that the water was quite out of his reach. He tried again and again to reach and at last tumbled in, heels over head. He was not, however, much hurt, and as the water was not very deep, he was glad enough to drink it.

Ex. 22:—All of a sudden, I was rudely addressed by a goblin (spirit) of a dreadful appearance "Hey! Who art thou? Where do you come from?" I replied fearlessly, "Gentle one, I am a Brahmin. I fell into the sea from the hands of my enemies. Then, I found myself in a Yavana-ship. From there, I have come to this excellent mountain. I take rest on the banks of this tank. May you fare well!" He rejoined "If you fail to answer my questions I shall eat you up." I replied. "All right! just ask them. Let us see!" And then, we carried on our conversation in a single verse.

Ex. 23:— Pururavas was in the habit of paying a visit to Indra every day. Having ascen-

ded his car, accompanying the sun in his southern course he beheld on one occasion the demon Keshin seize and carry off the nymphs Chitralekha and Urvashi. The king attacked the demon and destroyed him with the shaft of Vayu by which he not only rescued the nymphs but established Indra on his throne, which the demon had endangered. For this service Indra repaid the monarch with his friendship and gave him additional power, splendour and glory.

Ex. 24:—Shukra threw down the cup hastily on the ground and throwing up his hand in great indignation, he exclaimed: "I am undone. The trick of my enemies has succeeded. This habit of drinking wine has nearly brought me to ruin. This learning, that I have acquired in my mind so carefully until now, will no longer remain with me. The enemies of the demons will know it and they will make ample use of the learning. Fie upon me, and cursed be the Brahmana who henceforth drinks even a drop of wine. Oh demons, you have taught me a good lesson which I will not forget till my death. My daughter, what shall I do now? Hitherto I have fulfilled all your desires according to my strength. But now you are asking me to do a thing which will destroy me completely."

Ex. 25:—Nahusha, a grand son of Pururavas, was a mighty king who destroyed bands of robbers; but he levied taxes on the Rishis too and commanded them to carry him on their backs like beasts of burden. He even overpowered the gods and ruled the heavens for a long time in Indra's stead. He desired Indra's wife Shachi as his wife and grew so haughty that he yoked the divine Rishis to his chariot, treading on Agastya's head. Now this was resented by the great sage and he cursed Nahusha so that he fell from heaven and was obliged to live on the earth as a snake for ten thousand years.

Ex. 26:—Dhruva, thouhgh a child of about seven, went to a forest. There he practised penance for six months. Lord Narayana was mightily pleased with the child's intense devotion. Mounted on Garud He flew where Dhruva stood and showed himself. Dhruva opened his eyes and saw Him. He at once flung himself at the holy feet of the Lord, and shed tears of joy. But being a mere child he was not able to find suitable words in which to praise him. The Lord saw this and gently touched his cheeks with his counch, when lo! flood of words came to his lips.

Absolute construction

"When the participle agrees with a subject, different from the subject of the verb, the phrase is said to be in the absolute construction." (Bain's Grammar) Note the following sentences. (1) The *sun* having risen, the *army* began its march. (2) The *father* being dead, the *son* looked after his estate. In the first sentence the finite verb is 'began' whose subj. is 'army' quite different from 'sun' which is the subj. of the participle 'having risen.' Similarly in the second sentence 'son' and 'father' are different subjects. Thus here the constuction is absolute. But the above sentences can be otherwise constructed: (1) When the sun arose the army marched. (2) When the father was dead the son looked after his estate.

The *subject* or *object* of the absolute phrase in its own form or even its pronoun should not be repeated in the principle sentence except in the genitive. कारक विभक्तिs are directly connected with the verb in a sentence, while the genitive case being a विशेषण विभक्ति has no connection whatsoever with the verb. Thus there is a reason for its exception.

Arjuna, being advised by Krishna, began

to fight. Here the subject being the same there is no absolute phrase. It may be translated in Sanskrit as: कृष्णेनोपदिष्टोऽर्जुनो योद्धुं प्रचक्रमे। *Arjuna* being instructed by Krishna, a terrible *battle* took place: Here subjects are different. The construction is, therefore, absolute. कृष्णेनोपदिष्टेऽर्जुने तुमुलं युद्धं समापेदे।

In Sanskrit the subject of the absolute phrase can be used in locative or genitive. सूर्ये तपति सति तमिस्रा कथं दृष्टेरावरणाय कल्पेत। शूद्रके महीं शासति ध्वजेषु प्रकम्पाः। मयि जीवति को नाम तातकेशानाक्रष्टुं धृष्णुयात्। अकालो नास्ति धर्मस्य जीविते चञ्चले सति। जीवत्सु पितृपादेषु का चिन्ता परिणीतच्छत्राणाम्। हरेण कामे दग्धे सति तस्य भार्या रतिर्विललाप। In the last sentence तस्य (a demonstrative in the gen.) is repeated for कामः keeping भार्या to be the subject of the verb in the principal sentence. But we cannot say गोषु दुह्यमानासु ता जलमपाययत्। प्रत्यासन्नेषु याचकेषु तेभ्यो द्रव्यं देहि। Here ताः (Acc.) & तेभ्यः (Dat.) are repeated for गोषु & याचकेभ्यः respectively.

Genitive absolute is used to show contempt-disregard (अनादरार्थे षष्ठी):–नन्दाः पशव इव हताः पश्यतो राक्षसस्य। Notwithstanding that राक्षस was looking on (under his very nose) the नन्दाs were killed. पश्यतो गुरोः शिष्येणाविनयः कृतः। Here also disregard is shown to guru.

The present participle सत् is sometimes omi-

tted: नाथे कुतस्त्वय्यशुभं प्रजानाम्। कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि। क्षणभंगुरेषु प्राणेषु काऽऽस्था पुत्रदारेषु। त्वयि दुःखितायां नाहमात्मनः पाणिं ग्राहयिष्यामि।

The potential pass. participle is also used besides Pre. P. & P. P. 'पुरुषोत्तमे' इति भणितव्ये 'पुरूरवसि', इति निर्गता वाणी। Instead of saying 'In Purushottam' she said 'In Pururavas.' विधवाया निर्वाहे कर्तव्ये श्वशुरेण सा गृहान्निर्वासिता। अध्ययन आरब्धव्ये स क्रीडापरो बहिर्गतः।

The sense of 'as soon as,' 'no sooner-than,' 'the moment that,' 'scarcely-when,' etc. is expressed by the loc. absolute with एव or with मात्र compounded with the participle and used in loc. with or without एव–अप्रभातायामेव रजन्यां (when it had scarcely dawned). अवसितवचन एव मुनौ (as soon as the sage finished his speech). प्रविष्टमात्र एव तस्मिन्राजनि निरुपप्लवाः सञ्जाता अस्माकं धर्मक्रियाः (No sooner had the king stepped in, than our religious rites went on without let or hindrance). महाश्वेतया शप्तमात्रे पुण्डरीके तस्य प्राणाः शरीरान्निर्गताः। जातमात्रं शत्रुं व्याधिं च प्रशमं नयेत्।

1. **Pronouns**:— 1. नः, मे, वः, नौ, त्वा, वां, मा etc. the optional short forms of अस्मद् & युष्मद् are never used in the beginning of a statement and immediately before च, वा, एव or हा or immediately after vocative forms.

2. भवत् (3rd. person) always requires its verb

in the 3rd. person. भवान् गच्छति। भवन्तो गच्छन्तु।

3. तद्, when repeated, has the sense of a 'variety': तेषु तेषु शास्त्रेषु प्रवीणः। तैस्तैरुपायैः। गुणैस्तैस्तैर्विनय-प्रधानैः।

4. To make an indefinite pronoun चित्, चन, अपि and sometimes स्विद् are added to the forms of किम् (interrogative) in all genders and cases:- कश्चित्–कश्चन–कोऽपि, काचित–काचन–कापि, किञ्चित्–किञ्चन–किमपि, कस्मादपि–कस्माच्चित–कस्माच्चन, कस्यस्विद् etc.

5. To express the sense of 'whoever,' 'whatever,' 'whatsoever' the forms of किम् are used after the similar forms of यद्:- यस्मै कस्मै or कस्मैचित् धनिक इति कन्या न दातव्या। यो वा को वा भवाम्यहम्। येन केन प्रकारेण। यत्र कुत्रापि न स्थातव्यम्।

6. In the sense of 'one-the other, some-others, rest' the words एक–अपर or अन्य are used in sing. or pl. as the case may be. एको राज्याभिषिक्तः सिंहासनमध्यास्ते अपरोऽन्यो वा विरक्तो भूत्वा वनम्। विधवानां पुनरुद्वाहः शास्त्रनिषिद्ध इत्येके शास्त्रविहित इत्यपरेऽन्ये वा। (केचित् can be used for एके).

7. आत्मन् is always used only in sing. & masculine gender with a noun of any number or gender: ते पुरुषा आत्मनो निनिन्दुः is wrong. It should be आत्मानं।

2. Present participle:— It is used sometimes to show habit, ability, fitness. तिष्ठन्मूत्रयति। शत्रुं निघ्नानः। कवचं बिभ्राणः।

2. To show continuity of action the present participle is used mostly with आस् or स्था. He kept on waiting :- स प्रतिपालयन्-प्रतीक्षमाणः-सहमानः-क्षममाणो वा तस्थौ-आसाञ्चक्रे वा। गर्जंस्तिष्ठति।

3. **Future participle:—** It has the following senses :— 'About to do, going to do, before doing, wishing or intending to do'-करिष्यन् (m.), करिष्यती-न्ती (f.), करिष्यत् (n.). Wishing to go, about to go. etc. गमिष्यन् (m.) गमिष्यती-न्ती (f.) गमिष्यत् (n.). वन्यान्विनेष्यन्निव दुष्टसत्त्वान्। अन्नं भोक्ष्यमाणो (अन्नं बुभुक्षुः) हस्तपादमवनेनेक्ति। To express the idea of intention or desire विनेष्यन्-विनिनीषुः-विनेतुकामः-विनेतुमनाः (with म् of तुम् dropped) are used.

4. **Perfect participle:—** It shows the far off past as one who had done, lived, stood etc. according as the meaning of the root: नगरोपकण्ठमध्यूषिवांसः- those that had encamped in the vicinity of the town. श्रेयांसि सर्वाण्यधिजग्मुषस्ते-of thee who hadst long obtained all good things. अध्यूषिवस्, जग्मिवस्-जगन्वस्, जघ्निवस्-जघन्वस्, निषेदिवस्, तस्थिवस्, विद्वस्, ईयिवस्, उपेयिवस्, चकृवस्, ददिवस्, तुष्टुवस्.

5. **Potential passive participle:—** This ends in य, तव्य or अनीय. It indicates fitness, ability, obligation, uncertainty or probability. The agent of the action in this case is used in either genitive or instrumental :-गन्तव्या ते (त्वया) वसतिरलका

नाम यक्षेश्वराणाम्। मयापि तत्र भाव्यम्। स्वेषु स्वेषु व्यापारेष्वसंमूढै-र्भवितव्यम्। न वयमनुग्राह्याः प्रायो देवतानाम्। राक्षसेन्द्रस्य संरक्ष्यं मया लब्ध्यमिदं वनम्। त्वमप्सरसामपि स्पृहणीयः किमुत मानुषीणाम्।

6. Past active participle:— It is formed by adding वत् to the P. P. P. as गतवत्–गतवती, प्राप्तवत्–प्राप्तवती, उपात्तवत्–उपात्तवती, प्रोषितवत्–प्रोषितवती, जग्धवत्–जग्धवती. मया फलं भक्षितम् or अहं फलं भक्षितवान्–वती। इन्दुमती अजेन परिणीता or इन्दुमतीमजः परिणीतवान्।

7. Change in the pada of roots:— गम् (P.) सं+गम् (A.) शास् (P.) आशास् (Bless–hope A.) जि (P.) परा–वि+जि (A.), क्रम् (U.) उप–परा–प्र+क्रम् (A.), क्रीड् (P.) सं–अनु–परि–आ+क्रीड् (A.), यम् (P.) उप+यम् (To marry A.), रम् (A.) वि–आ–परि–उप+रम् (P.), स्था (P.) सं–अव–प्र–वि–उप+स्था (A.); ह्वे (P.) आ+ह्वे (to challenge A.) दा (U.), आ+दा (A.), प्रच्छ् (P.) आ+प्रच्छ् (to take leave of A.), विद् (U.) सं–प्रति+विद् (to recognise A.) पितरावपि मां न संविदाते। आ+हन् (A.) स्वशिर आहते। परन्तु परस्य शिर आहन्ति। सं+नह् (A.) युद्धाय संनह्यते। सं+गॄ (to promise A.) संगिरते शब्दम्। भुजोऽनवने (भुज् except in the sense of protection is A.) यवनाः शयाना भुञ्जते। ओदने भोक्तव्ये मूढो विषं भुंक्ते। सदयं बुभुजे मेदिनीम्। but भुनक्ति स्वाराज्यम्–governs or protects his kingdom.

Concord 1. The subject and its verb:— रामो गच्छति। पुरुषाः कार्यं कुर्वन्ति। त्वं मम सखा असि। गुणाः पूजास्थानं सन्ति। अहं त्वं च गच्छावः। अहं त्वं स च गच्छामः। त्वं स च गच्छथः। त्वं ते च गच्छथ। अहं गोपालो वा गच्छति।

ते त्वं वा गच्छसि। माता मित्रं पिता चेति स्वभावात्त्रितयं हितम्। शत्रुवधो मित्ररक्षा चोभयमपि करणीयम्। ऋषिणा कुक्कुरो व्याघ्रः कृतः। राजानं विष्णुं मन्यते। राजानं विष्णुरिति मन्यते। अवैमि चैनामनघेति। अदेयमासीत्त्रितयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे।

2. The adjective and its substantive:— कृष्णः सर्पः। कृष्णा सार्पिणी। गच्छन् पुरुषः। गच्छन्ती नारी। पाठोऽधीतः। गीताधीता। विद्वान्पुरुषः। विदुषी नारी। स पुरुषः। सा ललना। एते छात्राः। एताः नार्यः। अस्य पुत्रस्य। अस्याः कन्यायाः। इमे गृहाः। इमानि गृहाणि। राजा राज्ञी च सदयौ। सत्यं धृतिर्ज्ञानं तपः शौचं दमः शमः – एतानि ध्रुवाणि तस्मिन्नृपे। कृताः शरव्यं हरिणा तवासुराः। मालविका उपायनं प्रेषिता। रूपवद्भार्यः। रक्तनेत्रा। द्वितीयाभार्यः। शूद्राभार्यः। कान्ताभार्यः।

3. Relative pronoun and its antecedent:— यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः। कल्याणीयं प्रवृत्तिर्यद्राजा जीवति। शैत्यं हि यत्सा प्रकृतिर्जलस्य। नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः। यत्क्रूरत्वं स सिंहस्य स्वभावः। स्त्रीधर्मश्चैष यददुष्टो दुष्टो वा भर्ता सेव्यः।

The following words are mostly used in sing. & neuter gender पात्र, स्थान, पद, आस्पद, प्रमाण, भाजन। भवन्त एव प्रमाणं सन्ति। संपद आपदां पदं सन्ति। सा नारी तस्य प्रीतिपात्रमभवत्।

The following words are always used in pl. form but sing. in sense:—दार, अप् (f.), असु, वर्षा, सिकता, अक्षत, लाज, प्राण, गृह (m.), सुमनस् (flower), समा (year). सीता रामस्य दाराः। उष्णाभिरद्भिः स्नातः। असूंस्तत्याज। वर्षासु वर्षाभ्वो जायन्ते। यत्नपीडितास्वपि सिकतासु तैलं न लभ्यते।

अक्षताः पान्तु । अग्नौ वधूवरौ लाजानवाकिरताम् । मित्रं मित्रस्य प्राणाः अस्ति । प्रतिष्ठां मा त्वमगमः शाश्वतीः समाः । इमे नो गृहाः । सुमनसां (f. n.) गन्धः । (This last usage is not universal)

निषधेषु नलो नाम राजा किल बभूव । शूरसेनेषु मथुरा नाम नगरी । मगधदेशे-विषये पाटलिपुत्रं नाम नगरम् । अहं स्वप्ने कलिङ्गाञ्जगाम । 'ब्रह्म सत्यं जगन्मिथ्या' इति श्रीमच्छंकराचार्याः । दुष्यन्तः-"वयमपि भवत्यौ किमपि सखीगतं पृच्छामः" । रघूणामन्वयं वक्ष्ये ।

Nouns having the same meaning but different genders:— Army सैन्यं (n.) स्कन्धावारः (m.) चमू (f.), Assembly सदस् (the order of the gender as before: n. m. f.) समाज-सभा, bed शयन-तल्प-शय्या, Boat उडुप-प्लव-नौका, Body वपुस्-देह-तनु, Calamity व्यसन-अनर्थ-विपद्, Child अपत्य-अर्भक-संतति, Darkness तमस्-अन्धकार-तमिस्रा, Dawn प्रभात-प्रत्यूष-उषस्, Disgrace कलंक-अपमान-निकृति, Dust रजस्-पांसु=धूलि, Ear श्रोत्र-कर्ण-श्रुति, Energy वीर्य-प्रभाव-शक्ति, Envy मात्सर्य-मत्सर-असूया, Glory यशस्-प्रताप-कीर्ति, Hair रोमन्-केश-चूडा Head शिरस्-मूर्धन्-मौलि, Heaven त्रिविष्टप-स्वर्ग-दिव् or द्यो, Love प्रेमन्-राग-प्रीति, Nector अमृत-पियूष-सुधा, News वृत्त-उदन्त-प्रवृत्ति, Ray किरण-कर-मरीचि, Refuse शरण-आश्रय-गति, Road वर्त्मन्-पथिन्-वीथि, Ship प्रवहण-पोत-तरणी, Sky नभस्-आकाश-दिव् or द्यो, Snare जाल-पाश-वागुरा, Snow हिम-तुषार-मिहिका, Source मूल-प्रभव-योनि, Speed जवन-वेग-त्वरा, Story आख्यात-वृत्तान्त-वार्ता, Tip अग्र-प्रान्त-अणि, Vow व्रत-संकल्प-प्रतिज्ञा, Wife कलत्र-परिग्रह-भार्या, Wine मद्य-आसव-सुरा, Year वर्ष-संवत्सर-समा ॥

Government

Accusative:— रामो वनं गच्छति। जनकोऽयोध्यां दूतं प्रेषितवान्।

द्वादश वर्षाणि देवो न ववर्ष। सप्ततां त्रीण्यहानि। क्रोशं कुटिला नदी।

शय्यायां कन्यां शेते। शय्यां कन्याधिशेते। पर्णशालायामास्ते मुनिः। पर्णशालामध्यास्ते मुनिः। शार्दूलो वने वसति। शार्दूलो वनमधि–उप–अनु–आवसति। आचार्य आसने तिष्ठति। आचार्य आसनमधितिष्ठति।

धिगियं दरिद्रता। धिङ् मूढ। धिग्जाल्मान्। धिगर्थाः कष्टसंश्रयाः

कृष्णमुभयतो गोपाः। कृष्णं सर्वतो गोपाः। नृपमभितः परिजनाः। नृपं परितः सेवकजनाः।

किन्नु खलु मामन्तरेण चिन्तयति वैशम्पायनः। दुष्यन्तमन्तरेण कीदृशोऽस्या दृष्टिरागः। कुसुममञ्जरीमन्तरेण न राजते सहकारः। भवन्तमन्तरेण कोऽन्यः शक्रं जेतुं समर्थः।

ग्रामं निकषा–समया। अन्तरा त्वां च मां च कमण्डलुः।

जलं पिपासुः– जलस्य पिपासा। पितरमाराधयिता–पितुराराधयिता भव।

Instrumental:— कृष्णेन गोपा रक्ष्यन्ते। भीमो दुःशासनं गदया प्रहरति।

अलं मयि स्नेहेन। अलं महीपाल तव श्रमेण। अलं मामन्यथा गृहीत्वा। अलं बहु विकत्थ्य। अलमेषा क्षुधितस्य तृप्तये। अलं मल्लो मल्लाय। कृतमतिप्रसादेन। कृतमनेनाश्वेन। कृतमतिसाहसेन।

सुजनैः सह संगतिः–संपर्कः। सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति।

रामो लक्ष्मणेन सीतया च सह–साकं–सार्धं–समं वनं गच्छति।

विना ज्ञानं–ज्ञानेन–ज्ञानात् न मोक्षः।

प्राणैर्वियोजितः। प्राणैर्मुक्तः। चक्रान्मुक्तः। बुद्धया हीनः। एकेन ऊना। गुणैर्युक्तः। संतोषेण रहितः। गुणैः संपन्नः।

रामस्य सीतया वियोगः सञ्जातः। माऽभूत्ते क्षणमपि विशुता विप्रयोगः।

छात्राणां विलासेन किम्—को गुणः— किं प्रयोजनम्—कोऽर्थः —किं कार्यम्— किं क्रियते—किं फलम्। किं तव गोपायित्वा। विजयेनाहमर्थी। किं मामायास्य।

पित्रा—पितुः समः—समानः—तुल्यः—सदृशः। पित्रा—पितुः संनिभः—निभः—संकाशः—नीकाशः—प्रतीकाशः (समासान्ते)

व्याकरणं द्वादशवर्षैः श्रूयते। कियद्भिर्वा दिवसैस्ते परापतिष्यन्ति। अल्पीयसा कालेन सा सुतं प्रसुषुवे। क्रोशेन स पाठमधीतवान्।

कया दिशा गतः स जाल्मः। येन केनचिदज्ञातेन पथा न यातव्यम्। विमानेन गच्छति। शकटेनोह्यते। जीवितेन शपामि ते। शापितासि मे जीवितेन। भर्तुराज्ञां मूर्ध्नाऽऽदाय। पितुराज्ञापत्रं मूर्ध्नि विधृत्य गच्छेम। शिरसा भारं वहति।

धनदेन समस्त्यागे। स्वरेण रामं—रामस्य अनुहरति—अनुकरोति—संवदति। विष्णुना सदृशो वीर्ये क्षमया पृथिवीसमः।

दूरीकृताः खलु गुणैर्नगरकन्यास्तपोवनकन्यकाभिः। भक्त्या पूर्वानतिशेषे।

अध्ययनेन वसति काश्याम्। अक्ष्णा काणः। कर्णाभ्यां बधिरः।

कियता मूल्येन क्रीतं पुस्तकम्? द्वाभ्यां रूपकाभ्याम्। विधिना उपयेमे। जटाभिस्तापसः। गोत्रेण काश्यपः।

Dative:— नमः शिवाय। नमो गुरवे। नमो विश्वसृजे।

बालको मोदकाय स्पृहयति। स्पृहावती वस्तुषु केषु मागधी।

मह्यं फलं रोचते। यत्तस्मै रोचते तत्करोतु। तस्मै स्वदतेऽपूपः।

हरये क्रुध्यति—कुप्यति—द्रुह्यति—असूयति—ईर्ष्यति।

हरिमभिक्रुध्यति—संक्रुध्यति—अभिद्रुह्यति।

जीवितमपि तृणाय—तृणं मन्यते।

चण्डवर्मणे तामवस्थां संदिश्य । किं न तातस्याम्बाया वा संदिशामि ।

स्वागतं देव्यै । स्वागतं भर्तुदारिकायाः ।

रामाय (रामस्य) नि–आवेदयति । एकवारं सर्वेभ्यः (सर्वेषां) कथय ।

भोजेन दूतो रघवे (रघोः) विसृष्टः । हरिरस्मै (अस्य) सुराङ्गनां प्रजिघाय ।

मालविकायै प्रतिश्रुतं–प्रतिज्ञातम् । युद्धाय संनह्यते ।

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये । निर्जितेषु शत्रुषु तरस्विनां प्रणतिरेव कीर्तये । यवागूर्मूत्राय कल्पते–संपद्यते–जायते–भवति ।

प्रभवति मल्लो मल्लाय । अवज्ञातनृपस्य आज्ञा न प्रभवति प्रजानां योगक्षेमाय । (शक्तः–क्ता इत्यर्थे) हिमालयाद् गङ्गा प्रभवति (प्रभव इत्यर्थे) प्रभवति निजस्य कन्यकाजनस्य महाराजः । प्रभवत्याचार्यः शिष्यजनस्य । (ईष्टे) प्रभवन्त्योऽपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः । (ईशानाः) गुरुः प्रहर्षः प्रबभूव नात्मनि । (समावेशे) प्रभुः–शक्तः–समर्थः–क्षमः–अलं मल्लो मल्लाय (मल्लं पराजेतुं वा)

पुष्पेभ्य उद्यानं याति=पुष्पाण्यानेतुमुद्यानं याति ।

गोपालः शतं रूपकान्कृष्णाय धारयति ।

वाताय कपिला विद्युदातपायातिलोहिनी ।

स्वस्ति हरये । अग्नये स्वाहा । गवे (गोः) हितं–सुखं–कुशलम् ।

Ablative:— ग्रामाद्गच्छति । वृक्षात्पतति । अंसादवतरति ।

जाड्यात्–जाड्येन बद्धः । पापाज्जुगुप्सते । स्वच्छन्दाद्विरमति । अध्ययनात्पराजयते । पापान्निवारयति । पापादुद्विजते मे मनः ।

धर्मान्न प्रमदितव्यम् । स्वाधिकारात्प्रमत्तः । न प्रमाद्यन्ति प्रमदासु विपश्चितः ।

न भीतो मरणादस्मि । कण्ठीरवाद्रक्षितः । कपेर्नादादत्रासिषुः ।

बाल्यात् प्रभृति–आरभ्य–परं–अनन्तरं–ऊर्ध्वम् ।

वज्रादपि कठोराणि मृदूनि कुसुमादपि । सीता रामस्य प्राणेभ्योऽपि

प्रेयसी। पैतृकाद्रिक्थादुद्यमप्रियत्वं ज्यायः।

भरणाद्विनयाधानं विशिष्यते। तस्य दण्डः स्वदेहान्न व्यशिष्यत्। संभावितस्याकीर्तिर्मरणादतिरिच्यते। गृहं तु गृहिणीहीनं (नैर्जन्येन) कान्तारादतिरिच्यते। चैत्ररथादनूने वृन्दावने।

सेव्यात्सेवकजनो न सर्वदा परिहीयते गुणैः।

प्रासादात्प्रेक्षते=प्रासादमारुह्य प्रेक्षते।

श्वशुराज्जिह्रेति स्नुषा=श्वशुरं वीक्ष्य सा जिह्रेति। श्वशुरं पश्यन्ती सा जिह्रेति।

प्राक् सूर्योदयात्। वामादितरः। वनादारात्। (आराद्दूरसमीपयोः)

आ परितोषात्। आ कैलासात्। आजन्म-म्। आमरणम्। आमेखलम्।

समुद्रात्पुरी क्रोशे-क्रोशः। कार्तिक्या आग्रहायणी मासे। (only locactive).

ग्रामात्प्राक्-प्रत्यक्-दक्षिणा-दक्षिणाहि। गोमयाद्वृश्चिको जायते। लोभात्क्रोधः प्रभवति।

गुरोः शास्त्रमधीते। बालकादपि सुविद्या ग्राह्या किं पुनराचार्येभ्यः।

Genitive:— दशरथस्य चत्वारः पुत्राः। रावणस्य दश शीर्षाणि।

चतुर्षु-चतुर्णां रामो ज्येष्ठः। सर्वासां-सर्वासु- नदीषु गङ्गा द्राघिष्ठा।

दिनस्य द्विर्भुङ्क्ते। मासस्य पञ्चकृत्वः। दिवसस्य त्रिः सन्ध्यामुपास्ते।

वृक्षस्य पश्चात्-अग्रे-अधः-उपरि-दक्षिणतः-उत्तरतः।

मम पुरः-पुरतः-पुरस्तात्-समीपं-समीपे। तस्य सकाशं-सविधे-पार्श्वे-समक्षं-संमुखम्।

दक्षिणेन वनवाटिकायाः-वनवाटिकां कलरवः श्रूयते। तत्रागारं धनपतिगृहान् (गृहाणां) उत्तरेणास्मदीयम्।

तव मम च समुद्रपल्वलयोरिवान्तरं-विशेषः-भेदः।

एवं चिन्तयतस्तस्य घण्टाद्वयं व्यतीतम्। जाग्रतो मम त्रियामा प्रभाता।

ग्रामात्-ग्रामस्य वनं दूरं-निकटं-समीपम्।

सविता वै प्रसवानामीष्टे। अनीशोऽस्मि गात्राणाम्। धनानामीशिषे त्वम्।

न खलु स उपरतो यस्य वल्लभो जनः स्मरति। न पितुर्मातुर्वा स्मरिष्यामि वने वसन्ती त्वया सह। ईश्वरं मनसा स्मरामि। पिता पुत्रं स्मरति।

रामो लक्ष्मणस्य दयते। एतेऽपि भद्रमुखास्तव दयन्ताम्।

राज्ञां पूजितः–मतः–संमतः–विदितः–बुद्धः। भर्तुर्बहुमता भव।

राक्षसेन्द्रस्य संरक्ष्यं मया लब्ध्यमिदं वनम्।

अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम्।

मम कृते। अमीषां प्राणानां कृते।

Locative:— (दुष्टानां) दुष्टेषु श्रद्धा–प्रत्ययो–विश्वासो वा नैव कर्तव्यः।

सुदक्षिणायां तनयं ययाचे। शुकनासस्यापि मनोरमायां वैशम्पायनोऽजनि।

राज्यभारं सचिवे समर्पयति–क्षिपति। दुहितरमस्मै समर्प्य।

वितरति गुरुः प्राज्ञे (प्राज्ञाय) विद्यां यथैव तथा जडे।

मां लगुडेन प्रहरति। मयि प्रहर्तुं कः प्रभुः। एवमम्लानमालतीकुसुमकोमलतनौ निर्घृणं प्रहरन्न लज्जसे।

कस्मिन्नपि पूजार्हेऽपराद्धा शकुन्तला। किं पुनरसुरावलेपेन भवतीनामपराद्धम्।

गृहकर्मणि व्यापृतः–व्यग्रः–तत्परः–संसक्तः–व्याकुलः।

वीणावादने पटुः–प्रवीणः–कुशलः–पण्डितः–विशारदः–कोविदः।

न शोभते प्रणयिनि जने निरपेक्षता। असति विधुरदर्शने स्वामिन उपजीविषु मन्दादरा भवन्ति। प्रायो द्वितीयाभार्यः प्रथमायां मन्दादरो निरपेक्षो वा भवति।

कुरु प्रियसखीवृत्तिं सपत्नीजने। यथेच्छं तस्मिन्न वर्तितव्यम्। कथं

कार्यविनिमयेन मयि व्यवहरत्यनात्मज्ञः। परिजने दक्षिणो भव। शासने तिष्ठ भर्तुः।

राजा तं प्रधानपदे नियुङ्क्ते। तामाश्रमधर्मे न्ययुङ्क्त।

भक्त्या गुरैा मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व। भक्तिः शूलिनि। न तेषां पिशिताशने रतिर्न च मद्यपाने प्रीतिः।

एतत्त्वयि–तव न युज्यते–उपपद्यते।

सा त्वयि दृढं लग्ना। मयि स्निह्यति। भार्यायामनुरक्तः। तस्यां साभिलाषो भर्ता। दुर्वृत्ते वा सुवृत्ते वा जनो दातरि रज्यते। वाङ्मनः-कर्मभिः पत्यैा व्यभिचारो यथा न मे। तवायं न कामचारो मयि शङ्कनीयः। राजन्प्रजासु ते कश्चिदपचारः प्रवर्तते।

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।

अद्य भुक्त्वा स त्र्यहात्–त्र्यहे वा भोक्ता। अत्र स्थितः स क्रोशात्–क्रोशे वा लक्ष्यं विध्येत्।

प्रसितः–उत्सुको हरिणा–हरैा। शत्रैा बाणान्मुञ्चति–क्षिपति–अस्यति।

Illustrate the use of :— यावत्–तावत्, किं पुनः, वरं, यथा यथा, स्थाने, इव, पुनः, यत्सत्यं, परमार्थेन, नु, दिष्ट्या, तावत्, यावत्, कामं, क्व–क्व, केवलं, प्र+भू, स्मृ, अधि+शी, सं+क्रुध्, चतुः, अनु+कृ, ईश्, कृते, सदृश, नि+युज्, वि+रम्, स्पृह्, धृ, ह्री, अनु+रञ्ज्, प्र+मद्, प्रयोजनं, अलं, धिक्, अन्तरेण, भीति, भक्ति, प्राक्, आ+स्था, क्लृप्, अप+राध्, प्रति+श्रु, स्निह्, अभितः, अधि+वस्, दार, प्राण, लाज.

Present Participle

Formation :— In the case of Parsmaipadi roots of all the ten conjugations add अत् after dropping the present 3rd. per. pl. termination,

while in the case of Atmanepadi roots of the 1st, 4th, 6th & 10th conjugation, add अमान and for the rest add आन after dropping the said termination. The same principle operates in future participles regarding formation & declension.

Root	Form	Pre.Part.	Root	Form	Per.Part.
गच्छ्	गच्छन्ति	गच्छत्	लभ्	लभन्ते	लभमान
हन्	घ्नन्ति	घ्नत्	ईश्	ईशते	ईशान
दा	ददति	ददत्	हा(A.)	जिहते	जिहान
लुट्	लुटयन्ति	लुटयत्	युध्	युध्यन्ते	युध्यमान
चि	चिन्वन्ति	चिन्वत्	चि	चिन्वते	चिन्वान
विद्	विन्दन्ति	विन्दत्	विद्	विन्दन्ते	विन्दमान
छिद्	छिन्दन्ति	छिन्दत्	भुज्	भुञ्जते	भुञ्जान
कृ	कुर्वन्ति	कुर्वत्	कृ	कुर्वते	कुर्वाण
ग्रह्	गृह्णन्ति	गृह्णत्	ग्रह्	गृह्णते	गृह्णान
चुर्	चोरयन्ति	चोरयत्	चुर्	चोरयन्ते	चोरयमाण
कारय	कारयन्ति	कारयत्	कारय	कारयन्ते	कारयमाण

(अधि+इ–अधीयान, अस्–सत, इ–यत्, शी–शयान, आस्–आसीन)

	Pass			Pass	
कृ	क्रियन्ते	क्रियमाण	स्मृ	स्मर्यन्ते	स्मर्यमाण
दा	दीयन्ते	दीयमान	वस P.	उष्यन्ते	उष्यमाण
अव+सो	अवसीयन्ते	अवसीयमान	वह्	उह्यन्ते	उह्यमाण
आ+पॄ	आपूर्यन्ते	आपूर्यमाण	तॄ	तीर्यन्ते	तीर्यमाण
छिद्	छिद्यन्ते	छिद्यमान	आ+ह्वे	आहूयन्ते	आहूयमान
दापय	दाप्यन्ते	दाप्यमान	आरोपय	आरोप्यन्ते	आरोप्यमाण
पातय	पात्यन्ते	पात्यमान	आरम्भय	आरम्भ्यन्ते	आरम्भ्यमाण

(In the causal अय is dropped before passive य.)

Declension :— (1) न् is necessarily inserted before the final त् of the present participles ending in अत् in the first five forms of the mas. gender and those of the neuter Nom., Voc. & Acc. pl. except those of the roots of the 3rd. Conj. & शासत्, जक्षत्, चकासत्, दरिद्रत्, जाग्रत् which are declined like महत्, but these latter, (including participles of the 3rd. conj.) however, optionally take न् in the neuter Nom., acc., & Voc. plural.

Masculine

गच्छत्	Nom.	गच्छन्	गच्छन्तौ	गच्छन्तः
	Acc.	गच्छन्तम्	,,	गच्छतः
ददत् (3rd)	Nom.	ददत्	ददतौ	ददतः
	Acc.	ददतम्	,,	,,
जाग्रत्	Nom.	जाग्रत्	जागतौ	जाग्रतः
	Acc.	जाग्रतम्	,,	,,

Neuter

गच्छत्	Nom.	गच्छत्	गच्छन्ती	गच्छन्ति
	Acc.	गच्छत्	,,	,,
ददत् (3rd)	Nom.	ददत्	ददती	ददति or ददन्ति
	Acc.	ददत्	,,	,, or ,,
जाग्रत्	Nom.	जाग्रत्	जाग्रती	जाग्रति or जाग्रन्ति
	Acc.	जाग्रत्	,,	,, or ,,

(2) The feminine base of the present participle in अत् of the 1st, 4th & 10th conj. and of

the causal necessarily take न् before त् besides the final ई & those of the roots of the 6th. conj. and of 2nd. conj. ending in आ, the future participle ending in स्यत् and desiderative optionally take it, while in the rest of the conjugations only ई is added. (The feminine base thus does not differ from the form of the neuter Nom., Acc. & Voc. dual.) Atm. fem. base takes आ (ददान–ददाना, लभमान–लभमाना)

Parti	Fem. base (N. dual)	Parti	Fem. base (N. dual)
गच्छत् (1)	गच्छन्ती	पुष्यत् (4)	पुष्यन्ती
कथयत् (10)	कथयन्ती	दापयत् (causal)	दापयन्ती
इच्छत् (6)	इच्छती–न्ती	यात् (2nd in आ)	याती–न्ती
दास्यत् (fut.)	दास्यती–न्ती	कुर्वत् (8)	कुर्वती
शासत् (2)	शासती	ददत् (3)	ददती
ब्रुवत् (2)	ब्रुवती	आप्नुवत् (5)	आप्नुवती
क्रीणत् (9)	क्रीणती	भिन्दत् (7)	भिन्दती
जिगमिषत् (desi.)	जिगमिषती–न्ती	चिकीर्षत् (desi.)	चिकीर्षती–न्ती

Passive voice

Root	Act.	Pass	Root	Act.	Pass.
कृ	करोति–कुरुते	क्रियते	ऋ	इयर्ति	अर्यते
हृ	हरति	ह्रियते	कॄ	किरति	कीर्यते
पृ	पिपर्ति	प्रियते	पॄ	पिपर्ति	पूर्यते
स्मृ	स्मरति	स्मर्यते	जि	जयति	जीयते
स्तृ	स्तृणोति	स्तर्यते	श्रु	शृणोति	श्रूयते
जागृ	जागर्ति	जागर्यते	नी	नयति	नीयते

स्तु	स्तौति–स्तवीति	स्तूयते	सिच्	सिञ्चति	सिच्यते
भू	भवति	भूयते	वह्	वहति	उह्यते
ज्ञा	जानाति–जानीते	ज्ञायते	जन्	जायते	जन्यते–जायते
ध्यै	ध्यायति	ध्यायते	खन्	खनति	खन्यते–खायते
ग्लै, म्लै similarly			तन्	तनोति–नुते	तन्यते–तायते
स्था	तिष्ठति	स्थीयते	वस् A.	वस्ते	वस्यते
हा P.	जहाति	हीयते	वस् P.	वसति	उष्यते
हा A.	जिहीते	हायते	ग्रह्	गृह्णाति	गृह्यते
पा 1.	पिबति	पीयते	वच्	वक्ति	उच्यते
पा 2.	पाति	पायते	प्रच्छ्	पृच्छति	पृच्छयते
घ्रा	जिघ्रति	घ्रायते	चुर्	चोरयति	चोर्यते
दा 3.	ददाति–दत्ते	दीयते	दा	दास्यति	दास्यते–दायिष्यते
धा 3.	दधाति–धत्ते	धीयते	सो	सास्यति	सास्यते–सायिष्यते
गै	गायति	गीयते	हन्	हनिष्यति	हनिष्यते-घानिष्यते
सो	स्यति	सीयते	दृश्	द्रक्ष्यति	द्रक्ष्यते–दर्शिष्यते
दरिद्रा	दरिद्राति	दरिद्र्यते	गै	गास्यति	गास्यते–गायिष्यते
शी	शेते	शय्यते	नी	नेष्यति	नेष्यते–नायिष्यते
श्वि	श्वयति	शूयते	ग्रह्	ग्रहीष्यति	ग्रहीष्यते–ग्राहिष्यते
अस्	अस्ति	भूयते	भू	भविष्यति	भविष्यते–भाविष्यते
शास्	शास्ति	शिष्यते	वप्	वपति	उप्यते
वि+शिष्	विशिनष्टि	विशिष्यते	वश्	वष्टि	उश्यते
बन्ध्	बध्नाति	बध्यते	यज्	यजति	इज्यते
इन्ध्	इन्द्धे	इध्यते	ह्वे	ह्वयति	हूयते
भञ्ज्	भनक्ति	भज्यते	कारय	कारयति	कार्यते
ग्रन्थ्	ग्रथ्नाति	ग्रथ्यते	स्वप्	स्वपिति	सुप्यते
गम्	गच्छति	गम्यते	मा	मिमीते	मीयते

Act.	Pass.
मुनयो नगरं नाधिवसन्ति ।	मुनिभिर्नगरं नाध्युष्यते ।
सैनिकाः नगरीं गच्छन्ति ।	सैनिकैः नगरी गम्यते ।
बालका वृक्षान्पुष्पाण्यवचिन्वन्ति ।	बालकैर्वृक्षाः पुष्पाण्यवचीयन्ते ।
शाधि मां त्वां प्रपन्नम् ।	त्वां प्रपन्नोऽहं शिष्यै ।
रघुराघवौ जना ददृशुः ।	रघुराघवौ जनैर्ददृशाते ।
अहं फलं भक्षितवान्-वती ।	मया फलं भक्षितम् ।
अहं शत्रून्हनिष्यामि ।	मया शत्रवो हनिष्यन्ते-घानिष्यन्ते ।
स तत्र भवेत्-स्यात् ।	तेन तत्र भूयेत-भाव्यं-भवितव्यं-भवनीयम् ।
याचको धनिकं द्रव्यं याचते ।	याचकेन धनिको द्रव्यं याच्यते ।
गोपो गां ग्रामं नयति-हरति-कर्षति-वहति ।	गोपेन गौर्ग्रामं नीयते-ह्रियते-कृष्यते-उह्यते ।
शिष्यं धर्मं बोधयति ।	शिष्यो धर्मं बोध्यते or शिष्यं धर्मो बोध्यते ।

Change the voice:— (1) शूराः शत्रून्पराजयन्ते (2) पिपासितैः काव्यरसो न पीयते (3) कृषीवला भूमौ बीजं वपन्ति (4) जेतारः प्रतिस्थानं जयस्तम्भान्निखनन्ति (5) सर्वैः शकुन्तला पतिगृहगमनायानुज्ञायताम् (6) हे नदि कुतस्त इमानि जलानि वहन्ति (7) अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत् (8) द्विषतां शिरोभिः स भूमिमस्तृणोत् (9) बुधाः परगुणान्विवृणुध्वम् (10) स वृक्षमवचिनोति फलानि (11) चित्तं क्षुभ्नाति ते कथम् (12) रत्नान्यमथ्नन्नुदधिं दिवौकसः (13) प्राची ककुभ् मे लोचने हरति (14) त्वयाखिलं दिनमसुप्यत (15) आयाधिकं व्ययं कुर्वन्को न दरिद्राति (16) कुमार श्रूयतां तातसंदेशः (17) स धनुषि बाणान्संधत्ते (18) लोकसेवकं कीर्तिर्न परिजहाति (19) भरणाद्विनयाधानं विशिष्यते (20) कुम्भकारेण घटः

कृतः (21) उज्जिहीते जगज्जित्वा तस्य कीर्तिः सुरालयम् (22) रामो रावणं जघान (23) बालेन द्यौर्ददृशे (24) स्त्री अलंकारं परिहितवती (25) कादम्बरी महाश्वेतामनामयं पप्रच्छ (26) देवाः समुद्रं चतुर्दश रत्नानि ममन्थुः (27) देवदत्तो गोपालं शतं जेष्यति (28) स आसनादुत्तिष्ठति (29) क्रोधं प्रभो संहर (30) प्रतिपात्रमाधीयतां यत्नः (31) कुठारेण तक्षा काष्ठं छ्यति (32) भवानकिंचनत्वं व्यनक्ति (33) रात्रिरवस्यति (34) अपि दृष्टवानसि मम प्रियाम् (35) कुमारः शिलापट्टमधिशेते (36) वृन्दावने निर्विश्यतां सुन्दरि यैावनश्रीः (37) अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु (38) रत्नं समागच्छतु काञ्चनेन (39) कलापिनां प्रावृषि पश्य नृत्यं कान्तासु गोवर्धनकन्दरासु (40) क्वचिदलक्तकाङ्कां पदवीं ततान (41) दुकूलवासाः सोऽवरोधरक्षैर्वधूसमीपं निन्ये (42) कृशानोरुदियाय धूमः (43) धूमो निवर्त्येत समीरणेन (44) ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये (45) तामिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः (46) तयातिरोषात्सोढास्मि न त्वद्भवने वसन्ती (47) न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते (48) त्वया तत्र स्थातव्यम् (49) चन्द्रापीडः प्रातरेव किंवदन्तीं शुश्राव (50) नकुलस्तं दुष्टसर्पं विनाशयति (51) भवादृशा एव भवन्ति भाजनान्युपदेशानाम् (52) त्यजैनां वा गृहाण वा (53) आधोरणेन रज्ज्वा नागोऽपि बध्यते (54) न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते (55) तन्मुच्यतां देवि शोकानुबन्धः (56) जाने विसृष्टां प्रणिधानतस्त्वाम् (57) बाल्यात्परामिव दशां मदनोऽध्युवास (58) मनीषितं द्यैारपि येन दुग्धा (59) हे महाभाग! त्वं तव पूर्वजान्भक्त्यातिशेषे (60) किं क्रियते तेन द्रव्येण येन मनस औदार्यं नोपजायते (61) स न्यस्तशस्त्रो हरये स्वदेहमुपानयत् (62) जलबिन्दुनिपातेन क्रमशः पूर्यते घटः (63) सर्वाञ्जनानाह्वयतु (64) इन्द्रः शतं क्रतूनयजत्। अतस्तं शतक्रतुमभिदधति जनाः (65) हनुमान् रामलक्ष्मणैा स्कन्धाभ्यामवहत् (66) सर्वोऽपि

प्रत्याशया धार्यते (67) सैनिकोऽश्वमारोहयति कुमारम् (68) रामो लक्ष्मणमवदत् (69) तेन काष्ठममीयत (70) अपीतेषु तरुषु शकुन्तला जलं पातुं न व्यवस्यति (71) न यत्र कुत्रैवानिरूप्योषितव्यं त्वया (72) निरवहस्त्वं वैशम्पायनस्योपरि प्रीतिम् (73) अहमेव दुःशासनं हन्तेति भीमोऽवदत् (74) भर्ता स्वभार्यामनघप्रसूताममनुत (75) केन वापरेण वयं परिबोधनीयाः (76) यदि सुरभिमवाप्स्यस्तन्मुखोच्छ्वासगन्धं तव रतिरभविष्यत्पुण्डरीके किमस्मिन् (77) कवयो दिक्षु राज्ञो यशांसि प्रतन्वन्ति (78) रुन्धन्तु वारणघटा नगरं मदीयाः (79) नाभिवर्धनात्प्राग्जातकर्म विदधीरन् (80) हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः

Gerund or absolutive

1. त्वा–दा–दत्त्वा, पा१–पीत्वा, गम्–गत्वा, रम्–रत्वा, मन्–मत्वा, हन्–हत्वा, दह्–दग्ध्वा, दुह्–दुग्ध्वा, लिह्–लीढ्वा, तॄ–तीर्त्वा, कृ–कृत्वा, दृश्–दृष्ट्वा, नश्–नशित्वा, नष्ट्वा or नंष्ट्वा, पत्–पतित्वा, कथ्–कथयित्वा, कारय–कारयित्वा, शम्–शमित्वा or शान्त्वा, तन्–तनित्वा or तत्वा.

2. य is added when the root is **prefixed** and ends in a long vowel or a consonant:— आ+दा=आदाय, प्र+नी=प्रणीय, अव+सो=अवसाय, आ+ह्वे=आहूय, अनु+भू=अनुभूय, आ+स्तॄ=आस्तीर्य, अधि+शी=अधिशय्य, सं+पद्=संपद्य, वि+घुष्=विघोष्य, प्रतारय=प्रतार्य, प्र+नमय=प्रणमय्य, वि+गणय=विगणय्य, अधि+शायय=अधिशाय्य, आनायय=आनाय्य. Notice in the causal and roots of the 10th. conj. whole अय, while in the case of those that have a penultimate short vowel only the final अ of अय is dropped.

3. त्य is added when the root is **prefixed** & ends in a short vowel: अनु+कृ=अनुकृत्य, सं+कृ=संस्कृत्य,

अनु+सृ=अनुसृत्य, वि+चि=विचित्य, परा+जि=पराजित्य, प्र+इ=प्रेत्य, अनु+श्रु=अनुश्रुत्य, अव+मन् (न् dropped)=अवमत्य, प्र+हन्=प्रहृत्य, वि+तन्=वितत्य.

4. अनु+गम् (म् optionally dropped)=अनुगम्य or अनुगत्य, वि+रम्=विरम्य or विरत्य, प्र+नम्=प्रणम्य or प्रणत्य, नि+यम्=नियम्य or नियत्य।

5. प्रादुस्, तिरस्, श्रद्, अन्तर्, नमस्, etc. are to be looked upon as उपसर्गाः (prefixes)–प्रादुर्भूय, तिरस्कृत्य, अन्तर्धाय, श्रद्धाय, नमस्कृत्य but अगत्वा, अकथयित्वा, अग्निसात्कृत्वा. In case of च्वि forms the noun or adj. preceding भू or कृ is to be treated as a prefix: मात्रीकृत्य, तृणीभूय, लघूकृत्य, पर्वतीकृत्य, उन्मनीभूय.

6. There are denominative forms like उत्कलापयित्वा (taking leave) where उत्कलाप is one compact word.

7. णमुल् forms are as good as gerunds: श्रावंश्रावं, स्मारंस्मारं, स्वादुकारं, लोष्टघातं, जीवग्राहं, ब्राह्मणवेदं, चूर्णपेषं.

Note:— Before त, त्वा and तुम्, इ is added as a principle when the root is **set** and not at all when it is **Anit** and the same changes take place before तुम् as before ता of the 1st. future.

Root	p. p.	Infinit. of Purpose	Root	P. P.	infinit. of purpose
नी	नीत	नेतुम्	कृ	कृत	कर्तुम्
जि	जित	जेतुम्	भृ	भृत	भर्तुम्
श्रु	श्रुत	श्रोतुम्	स्तु	स्तुत	स्तोतुम्

तॄ	तीर्ण	तरि–रीतुम्	आ+दा	आत्त	आदातुम्
गम्	गत	गन्तुम्	रम्	रत	रन्तुम्
हन्	हत	हन्तुम्	मन्	मत	मन्तुम्
दृश्	दृष्ट	द्रष्टुम्	सृज्	सृष्ट	स्रष्टुम्
धा	हित	धातुम्	ग्रह्	गृहीत	ग्रहीतुम्
हा P.	हीन	हातुम्	अद्	जग्ध	अत्तुम्
मुच्	मुक्त	मोक्तुम्	भुज्	भुक्त	भोक्तुम्
दह्	दग्ध	दग्धुम्	लिह्	लीढ	लेढुम्
मुह्	मुग्ध-मूढ	मोहितुं-मोग्धुं-मोढुम्	शी	शयित	शेतुम्
स्वप्	सुप्त	स्वपितुम्	यज्	इष्ट	यष्टुम्
नह्	नद्ध	नद्धुम्	वस् P.	उषित	वस्तुम्
पत्	पतित	पतितुम्	नश्	नष्ट	नशितुं–नं–नष्टुम्
शम्	शान्त	शमितुम्	दम्	दान्त	दमितुम्
छिद्	छिन्न	छेत्तुम्	भिद्	भिन्न	भेत्तुम्
कथ्	कथित	कथयितुम्	रच्	रचित	रचयितुम्
वेदय	वेदित	वेदयितुम्	विस्मापय	विस्मापित	विस्मापयितुम्
सह्	सोढ	सहितुं–सोढुम्	गै	गीत	गातुम्

———*———

Some hints on coumpounds:— 1. If a compound ends in a sing. or pl. number it should be first dissolved in the *nom. case* of that number and then it should be placed in the case in which it ends. e. g. राजपुरुषैः (Inst. pl.) राज्ञः पुरुषाः (not पुरुषः or पुरुषैः) राजपुरुषाः तैः राजपुरुषैः (ष. तत्पु.) आपद्गताय (Dat. sing.) आपदं गतः (not गताय) आपद्गतः तस्मै आपद्गताय (द्वि. तत्पु.)

2. In a Bh. compound whatever the gender of the last component may be the gender of the comp. should agree to the *gender of the noun to which it refers.* e.g. तपोधनैः (ऋषिभिः) (Inst. pl.) Here धनं is neuter but the comp. refers to 'ऋषयः' which is masculine. Therefore तपः एव धनं येषां ते तपोधनाः (not धनानि) तैः तपोधनैः (बहु.). मृतभार्याय (पुरुषाय) Here भार्या is fem. but the comp. refers to 'पुरुषः' which is mas. Therefore भार्या is changed to भार्य to suit पुरुष. मृता भार्या यस्य स मृतभार्यः–मृतभार्यकः–र्यकः (not. मृतभार्या) तस्मै मृतभार्याय (बहु.). प्रोषितभर्तृकाणां (नारीणां) Here भर्तृ is mas. but the comp. refers to 'नारी' which is fem. Therefore प्रोषिताः भर्तारः यासां ताः प्रोषितभर्तृकाः तासां प्रोषितभर्तृकाणाम्। सपुत्रा (स्त्री) Similarly:— प्रवयाः, प्रपर्णः, कमलनयना, सुग्रीवः, सभार्यः, पीताम्बरः, चारचक्षुषः, उन्मनाः, निन्दा च स्तुतिश्च–निन्दास्तुती (fem. dual) तुल्ये निन्दास्तुती यस्य सः–तुल्यनिन्दास्तुतिः (कश्चिन्नरः mas. sing.) The no. and gender of यद् should agree to the no. & gender of the noun referred to.

1. (Form Compounds) राज्ञः पुरुषः। दिवः मणिः। समिधः कुशाश्च। आशिषः वचनम्। पुमांश्चासौ गौश्च। विद्वान् जनः। उपानहे चर्म। तिरश्चां योनिः। अन्या दिक्। मम कृते। गङ्गा च यमुना च। गङ्गा च शोणश्च। अहयश्च नकुलाश्च। अन्यज्जन्म। महती चासौ पूजा च। रथिकाश्चाश्वारोहाश्च। नीलं च तदुत्पलं च। इन्द्रः प्रमुखः येषां–तैः। आदौ गृहीतः पश्चात्प्रतिमुक्तः–तेन। मया सदृशः। कुत्सितः पुरुषः। पञ्च वा षड् वा। सीता जाया यस्य–तेन। वनं ओकः येषां–तैः

उत्पलस्य गन्धः इव गन्धः यस्य सः or तत्। विगता तृष्णा यस्य सः। कमले इव अक्षिणी यस्याः– तस्यै। दुष्टाः प्रजाः यस्य सः– तेन। शोभनः गन्धः यस्य सः। चन्द्रः इव आननं यस्याः सा। चतुर्थी भार्या यस्य सः। पर्वते पर्वते। अहनि अहनि। कालमनतिक्रम्य। मक्षिकाणामभावः। शोणमन्वायतम्। चतुर्णां समीपे ये सन्ति ते। परितोषात् आ। आ शिखरात्। विष्णोः पश्चात्। आत्मनि इति। त्रिः आवृत्ताः दश। महत्तपः यस्य सः। तपः एव धनं यस्य सः। भार्यया सह–तस्मै। समानः पतिः यस्याः सा। समानमुदरं यस्याः सा। रमायाः कान्तः or रमा कान्ता यस्य सः। परिणतं वयः यस्य सः। प्रपतितानि पर्णानि यस्य सः। चत्वारिंशतः अधिकाः। द्विः आवृत्ता विंशतिः। पञ्चाशतः आसन्नाः। उत्तरस्याः पूर्वस्याश्च दिशोः अन्तरालं–तस्याः। मद्राणां राजा–तस्मै। शोभनश्च असौ राजा च। काश्याः पन्थाः–तेन। त्रिंशतः अदूराः। कृष्णस्य सखा–तस्मिन्। पूर्वं अहः। पञ्चानां रात्रीणां समाहारः। सत्यमेव धर्मः यस्य सः। सत्यमेव धर्मः। न मित्रम्। पूर्वं श्रुता।

2. Name & dissolve compounds:— भाषान्तरं, संतुष्टमनोभिः, सुखोदर्कः, पूर्वकायः, एकोनविंशतिः, द्यावापृथिव्योः, वनान्तरे, हेमपात्रगतं, सुरकार्योद्यतं, पुरुषान्तरेण, पद्मव्यजनहस्तया, अप्रतिमतेजसा, विरजस्कैः, हविर्भुजां, सुखभाग्भ्यः, अस्त्रकोविदः, स्थितिभिद्, मर्मच्छिद्भिः, निष्प्रभः, दिनात्यये, आशुगेन, लक्ष्मणाग्रजः, शूर्पणखा, लवणाम्भसि, परिखालघुः, टङ्कच्छिन्नमनःशिलः, मेघनादस्य, तच्छोणितनदीषु, मुहूर्तवक्त्राभरणं, प्रजानुरञ्जनलब्धवर्णः, नखाग्रैः, धन्वमुख्यैः, अनागाः, मनुप्रभृतिभिः, इक्षुच्छायं, वटच्छाया, महोदधेः, हरजटाभ्रष्टां, लोकान्तरसुखं, राजेन्दुः, क्षत्रियापसदः, मुनिवृत्तिनां, व्यूढोरस्कः, शालप्रांशुः, नीलोत्पलगंधि, समित्कुशफलाहरैः, महिषीसखः, भुजङ्गपिहितद्वारं, धनुर्भृतः, पल्लवरागताम्रा, वज्रपाणिः, दिनावसानोत्सुकबालवत्सा, कृशोदरी, मासावरः, फेनधवलः, सदारः, पयोदेन, चिन्मात्रं, उत्तराप्रलापोपजनित-

कूपः, रामसीते, सीतारामौ, आहारनिद्राभयं, हंसौ, आखुभुक्, युवजानिः, सुखदुःखे, दिवारात्रं, पितरौ, अहोरात्रं, शय्यागता, वर्षभोग्यः, ब्राह्मणार्थः, तौ, भ्रातरौ, जनुषान्धः, वाचस्पतिः, छायातरवः, प्रवातः, चन्द्रचूडः, अनपत्यः, सकलत्रः, दृष्टपूर्वा, उत्तरपूर्वा, चिन्तामणिः, दामोदरः, गाण्डीवधन्वा, संवर्धनपरः, तत्परः, नारायणः, प्रकृतिमधुरा, युवराजः, करभोरुः, वामोरूः, विनोदविमुखः, प्राञ्जलिः, वृक्षविशेषः, मोहपरायणः, समरभीरुः, पापकर्मनिरतः, दैवाधीनं, नरोत्तमः, रणधुरा, मदायत्तं.

———*———

1. Give causal & primitive present participles, P. P., gerunds & Infinitive of purpose of:— या, वि+रम्, रुह्, प्र+नी, भिद्, वि+हन्, जि, वि+क्री, भू, अव+सो, स्मि, वि+स्मृ.

2. Recognise:— लीढः, शिष्याः, आध्वे, पर्यैक्ष्यत, ऐयरुः, चतुरः, हंसि, औष्ट, ऊषे, परिजिहीर्षु, अश्रौषीत्, अप्राक्षीत्, नरः, शेषे, वक्ष्यति, जुहाव, जज्ञे, महनीया, महती, आनर्च्छुः, अहास्यः, वर्त्स्यन्तौ, सोढुं, अवतार्य, संगंस्यमाना, विशीर्णा, उपेयिवान्, देवः, अवोचः, समानयन्, प्रत्याययति, आनाय्य, अभ्यर्णः, क्षीणा, उपात्तः, व्यरंसीत्, निरगात्, मलिनीभवन्ति, मा गमः, विरचय्य, जिघृक्षुणा, लीढाम्, जाग्रति, अस्थ्नः, द्यौः, विवासितौ, व्यजीजनत्, दवीयान्, पर्यणंसीत्, यियासोः, उदीर्णः बीभत्समानाः, निरूढा, अजायि, यूनः, पथा, प्राविक्षत्, स्थायिष्यते, अयासीत्, स्मारं स्मारं, तूष्णीकृत्य, अगमन्, अगुः, लिप्सौ, वैरायते, अग्राहि, अधृष्येण, कृतवति, प्रापय्य, जीवग्राहं, व्यानशिरे, न्यधिषि, आदित्समानः, निर्वापितः, अपोह्य, अध्यवसाय्य, व्यानशे, जापितवती, उपेयुषी, क्षोदीयोभिः, ब्राह्मणदर्शं, दिदृक्षमाणा, आसादितः, आदास्यमानः, यियक्षोः, क्षामः, नः।

3. Join with Sandhi:— पुनः रमते। प्रविशेत् जनः।

का एव। केयूरकः अब्रवीत। केचित् हृष्टवदनाः जनाः अस्याम् भूमौ आद्रियन्ते। तान् तान् लोकान् जनाः अवाप्नवन्तः। तस्मात् शास्त्रम् प्रमाणम्। इति एवंविधैः अन्यैः च मृदुभिः उपायैः ताम् सान्त्वयन्। हरिः रम्यः। एषः मे पिता। एषः अहम्। तस्मिन् अरण्ये अस्ति। वधू आनीयेते। अमी अश्वाः भवन्ति। प्रातः अत्र। रामः अस्मि। रामः टीकते। वृक्षः चलति। नरः तिष्ठति। केचित् मदीयाः जनाः प्रधावन्ति। वसन् इह। विप्रः पठति। विप्रः भणति। तव एव। नगरे अस्मि। रम्भा+छाया। अमू आगच्छतः। धेनू इमे। विष्णो इति। सम्यक् हिताय। प्रावृष् हृष्टः। एतत् श्रुत्वा। मयूराः हर्षनिर्भराः। कम्पेते अरी। दर्दुराः आरटन्ति। दर्दुराः रटरटायन्ते। गावः अधिगताः। अरीन् शरैः हन्ति। एते एव। एते अदूरवर्तिनः। मुढ्+ढ। अहो अयम् मे मनसः विलासः। गिरी आरोहति। विप्रः आगच्छति। तस्य छाया।

Give inst. sing. & genitive pl. of: (only in एन, आ, नाम् & note where न् is changed to ण्) अर्भक, सरल, द्विरेफ, द्विरद, निरय, प्रग्रह, वृक, राम, ऋषि, पर्ण, कूप, दर्भ, षण्ड, अर्घ्य, वर्त्मन्, पर्वन्, महार्ह, रघु, वप्र, मर्त्य, भृत्य, दर्पण, अर्क, तृप्त, राग, नम्र, कष्ट, रङ्ग, षष्ठ, रङ्क, भृंग, शृङ्ग, द्रव्य, धूर्त, कर्तव्य, रजक, कृष्ण, वर्मन्, सर्प, पुष्प, अभ्र, and state clearly giving reasons what you have to say on this point in connection with future pass. participles of *Set* & *Anit* roots.

4. Distinguish :— आसे–आसि, लेढु–लेढुं, आस्त–आसित, पीतः–पितः, मृष्टः–मृष्ठः, इयुः–ईयुः, यन्तु–यान्तु, इहि–एहि, सलिलं–सलीलं, द्व्यहः–द्व्यहः, पूर्वरात्रः–पूर्वरात्रिः, स्थूलाक्षा–स्थूलाक्षी, राजवती–राजन्वती, उशितः–उषितः, उदकवान्–उदन्वान्, सुगंधः–सुगंधिः, सुनु–सूनु, अपाक्षीत–अप्राक्षीत्, किंराजा–किंराजः, दासीपुत्रः–दास्याः पुत्रः, कापुरुषः–कुपुरुषः, महासेवा–महत्सेवा, निवेश्य–निविश्य,

अष्टगुः–अष्टगवम्, समानधर्मः–समानधर्मा, मन्यमानः–मन्वानः, ब्रुवन्ति –ब्रुवति, आसाद्य–आसद्य, संमतः–संमत्तः, त्रयोदश–त्रयोदशः, शितः–शीतः, विशत्याः–विंशत्याः, गुरुणि–गुरूणि, आयतः– आयत्तः ।

5. Give optional forms of :— परे, मोहित्वा, उपगम्य, जरसे, नृणां, मत्याः, विशत्याः, द्वितीयाय, अवेः, अष्टुं, चिनुवः, अयुः, स्तैमि, अश्वसीः, उत्तरपूर्वायाः, प्रत्यहं, मार्जन्ति, राज्ञि, बिभ्रति, लघूः, गुरुणि, नामनी, पतिष्यती, विरम्य, बुद्धौ, जक्षति, द्वितये, चकाधि, अशाः, चिकाय, अख्यान्, अरवीः, आहुः, वेत्तु, जहिवः, बिभीत, दोर्भ्या, अहिनत्, शशरुः, शुश्रुवतुः, जजागरुः, जक्षुः, जजरुः, ऊये, बिभाय, सस्वञ्जे, शुचिने, वर्तिष्ये, मृदुनोः, मघो, शकुना, कल्पिताहे, अष्टसु, अधिगिरि, वृद्धतरा, त्रिधा, नंक्ष्यामि, ते, अनयोः, उपनदम्, स्नातीषु, षड्धा, अरोदः, अष्टचत्वारिंशी, कतिपयाः, स्थास्यते, धिये, नौ, वत्स्यत्यै, द्विपञ्चाशत्तमी, श्रियां, नतेः, हनिष्यमाणः, अद्रक्ष्यत, रुच्याम्, त्वा, स्वे, इमान्, सानुना, ददति, अद्विषन्, प्रथमाः, खात्वा.

6. Give cognate forms of :— अदायि, अलिक्षत्, अकार्षीत्, अजैषीत्, अजीजनत्, अप्राक्षीत्, अनायि, अवोचत्, अपप्तत्, अचोरि, अवात्सीत्, अध्यायि, अजनि.

Corrections (in brackets)

P. 1 मोनं (मौनं), क्लब्यं (क्लैब्यं) P. 4 रंहो (रंहः) P. 7 भ्यचित (भ्यर्चित), P. 8 वशम्पायनो (वै.), P. 9 जराधि (जराध-), P. 11 शिखरमपि। (शिखरमपि), P. 12 पदे उत्प्रे (पद उ०), P. 19 अनुज्झित (-ज्झि-), P. 22 हरति' (हरति,), आन्दयति। (आनन्दयति'), P. 24 श्रुतान्ता (त्ता०), तलोपविष्टौ (तल उपविष्टौ), P. 25 अदृष्टपूर्व (र्वां), P. 29 स्नात्स्वा, ज्ञात्स्वा (त्वा), संयमे- (संयम्ये-), मति (मार्ति), P. 32 कादम्बरी (-म्ब-), P. 34 प्रेषितः (प्रेषितः।) मेव। न (मेव- 'न), P. 36 -वर्गोऽ (वर्जोऽ),

यामेवं (यामेवं), विज्ञानं तेंन (विज्ञातं), ०गम्य मानः (०म्यमानः), देव, ('देव,) सुमार (कुमार), P. 37 वीर्घिका (का–), अध्यास्ते। (स्ते'), ०यूरकः देवि, (०यूरकः–'देवि,) परिजन दश्य– (परिजनद०), उपरूढ (रूढ–), कर्तुम् (कर्तुम्'), पत्रलेखा (खां) P. 38 कश्चित्कु– (कश्चित्कु–), शलो (शली), परिजनाम्बा (परिजनेनाम्बा), विज्ञाप्य (प्या), न्ययुङ्क्त (ङ्क्त), दीर्घ (र्घ), मर्ध (मर्घ), P. 39 किमिद (द–), ममस्नेह (मत्स्नेह), मधुना (म–), P. 40 दृष्टा (ष्ट्वा), स्कुन्निव (स्फु–), P. 41 सन्नृत्तो (सं०), इव, वक्त्रं (इव व०), मुजबल (भु०) P. 45 परङ्मुखी (०रा०), तदा भद्र– (तदाभद्रकं), पुण्क– (पुण्ड०), छरणगत (०णा०) माङ्क्षे, ते (माङ्क्षे ते), अपगत जीविते (०गतजीविते) क्रन्दा तत् (०न्दात्तत्), P. 46 चन्द्रपीड (०न्द्रा०), तस्थौ (तस्थौ।), पुनर्मरणम्। (०म्'।) P. 48 करोतु तु (omit तु) सहवियो० (सहा०) P. 50 भ्युपगतः। कपि० (०गतः कपि०), आदिष्टा च (०ष्टश्च), प्रतिक्रिया (०या–), इति। वृक्षे (इति'), P. 53 अभियाक्तु (०यो०), P. 54 अवधार्यं (०र्य), अकुर्वन्' (०र्वन्।), P. 55 गिरास० (गिरा 'स०), लक्ष्मण (०ण–), लक्ष्मी विरा० (लक्ष्मीविरा०), लावण्य (०ण्य–), P. 56 ०व्रणाभवम् (०व्रणा कृता), व्याकुली भ० (०लीभ०), मेवं विध (मेवंविध०), समभ्यमा– (०भ्यभा–), दनन्तर० (दन्तर०). P. 61 राजाननामा (राजानमा), P. 47 सृत्य (०ज्य), P. 44 भाम्यं (भ्रा०), P. 43 गनम् (गमनम्), P. 41 चुक्षषो (चक्षु०), P. 20 इन्दुस० (०श०), गुणासं (गुण०), ०स्पदी (०न्द्री).

Section II

P. 19 : line 20 Principle (०pal), P. 27 कन्यां (न्या), P. 30 व्यशिष्यत् (०त), P. 22 आ+स्था (आस्था), P. 33 उह्यमाण (०न), P. 34 Acc. pl. (add dual also), P. 35 Desiderative fem. base takes न् necessarily, ऋ (ऋ).

First section printed by R. P. Aryaprakash Press & second section by Charottar Printing Press both of Anand for the publisher on 25th May 1939.